# Sadguru Śrī Tyāgabrahma Sahasrakam Part II

# સદ્ગુરુશ્રીત્યાગબ્રહ્મસહસ્રકમ્ દ્વિતીયો ભાગઃ

## Document Information

Text title : Tyagabrahmasahasrakam 2

File name : tyAgabrahmasahasrakam2.itx

Category : deities_misc, puShpAshrIvatsan, gurudev

Location : doc_deities_misc

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Source : Sadguru Sri Tyagabrahma Pushpanjali 2015

Latest update : Offered on January 7 2026 Pushya Bahula Panchami, updated February 28, 2026

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

February 28, 2026

sanskritdocuments.org

# સદ્ગુરુશ્રીત્યાગબ્રહ્મસહસ્રકમ્ દ્વિતીયો ભાગઃ

ૐ

શ્રીરામજયમ્

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

॥ શ્રીત્યાગરાજસ્વામિકીર્તનરાગપુષ્પાવલી ॥

ૐ ગાનગઙ્ગાય વિદ્મહે । જ્ઞાનતીર્થાય ધીમહિ । તન્નો ગુરુઃ પ્રચોદયાત્ ॥

। ધ્યાનમ્ ।

નમઃ શ્રીરામભદ્રાય નાદસુધારસાય ચ ।
નાદોપાસનપૂજ્યાય સસીતાય નમો નમઃ ॥ ૧॥

નમઃ શ્રીત્યાગરાજાય નાદપૂજાવ્રતાય ચ ।
નાદોપાસિતરામાય ગુરુશ્રેષ્ઠાય તે નમઃ ॥ ૨॥

નમઃ શ્રીત્યાગરાજાય લયરાગસ્વરૂપિણે ।
રાગાવલિસુરાગાય રાગસન્નુતયે નમઃ ॥ ૩॥

નમઃ શ્રીત્યાગરાજાય રાગકીર્તનવાસિને ।
પુષ્પાવલિસુપૂજ્યાય આચાર્યાય નમો નમઃ ॥ ૪॥

ૐ

રાગપુષ્પાવલિસ્મેરરાગાવતારદૈવતઃ ।
રાગાક્ષરસુવાસશ્ચ રાગોપાસિતસદ્ગુરુઃ ॥ ૫॥

રાગમૂર્તિગુરુસ્વામી રાગસારરસપ્રિયઃ ।
રાગરાગસુનેત્રશ્રીસીતારામસ્વરાલયઃ ॥ ૬॥

રાગસારસરાગશ્રીરામરાગગસારસઃ ।
રાગસઙ્ગીતરામસ્વહૃત્સારસસુપૂજનઃ ॥ ૭॥

રાગાનુરાગસન્નૂતરાગસ્વરૂપરામકઃ ।

રાગસ્વરવિલોલશ્ચ રાગપુષ્પાર્ચનામુદઃ ॥ ૮॥

અક્ષરાનન્દદાયશ્રીરામાભિરામગાયનઃ ।
અક્ષરસ્વરરાગાભિનન્દિતશ્રીપકીર્તનઃ ॥ ૯॥

અગરાજસુતાપુત્રગણનાથાભિવન્દનઃ ।
અગરાજસુતાવેગવાહસત્કૃતિનન્દનઃ ॥ ૧૦॥

અસાવેરીસુરાગશ્રીરામસ્વાગતકીર્તનઃ ।
અમૃતાવર્ષલલિતોક્તરાગસ્વરમર્મવિત્ ॥ ૧૧॥

અઠાણારાગગીતશ્રીરામપ્રહર્ષદર્શનઃ ।
અઠાણાકર્તૃરામસ્વગાનઠાણાનિબન્ધનઃ ॥ ૧૨॥

અગ્રપૃષ્ઠદ્વિપાર્શ્વશ્રીરામલક્ષ્મણરક્ષિતઃ ।
અસમાનસ્વભક્ત્યાહ્વરામાવિર્ભાવભાવુકઃ ॥ ૧૩॥

અમૃતાવાહગાનશ્રીરામપાદાભિષેચનઃ ।
અતિલાવણ્યરામાતિલાલિત્યકૃતિલાલનઃ ॥ ૧૪॥

અભિરોરુદવાગ્વર્ષસંસ્પષ્ટસ્વમનસ્સ્થિતિઃ ।
આભેરીરાગસઙ્ગીતમનોગલનવાક્કૃતિઃ ॥ ૧૫॥

આકાશસુશરીરાત્મારામસજ્જ્ઞાનકીર્તનઃ ।
આગાધજ્ઞાનસઙ્ગીતસ્વરૂપસુસ્વરપ્રિયઃ ॥ ૧૬॥

આગીતગીતવેદાર્થસારકીર્તનબોધધિઃ ।
આગીતલોકતત્ત્વાર્થસર્વચિન્મયરૂપકઃ ॥ ૧૭॥

આભોગીગીતપૂજાવશ્યનૈશ્ચલ્યમનસ્સ્થિતિઃ ।
આપૂર્ણલલિતારાગમારુતીસેવનાનુતિઃ ॥ ૧૮॥

આમન્ત્રિતસ્વહૃત્પ્રેમસીતારામભવાપહઃ ।
આનન્દકન્દગોવિન્દનન્દનાદિવ્યનામગઃ ॥ ૧૯॥

આદ્યન્તરહિતસુગુણસીતારામરાગગઃ ।
આનૂતોદ્દણ્ડકોદણ્ડપાણિશ્રીરામનામગઃ ॥ ૨૦॥

આનન્દસુપ્રસન્નાપ્રમેયરામાહ્વકીર્તનઃ ।
આનન્દસુપ્રશાન્તક્ષીરસાગરવિહારગઃ ॥ ૨૧॥

આનન્દભૈરવીરાસસ્વમનોભાવરામગઃ ।
આધારરામસર્વસ્વદર્શસુજ્ઞાનપૂરગઃ ॥ ૨૨॥

આનન્દરામસાનન્દનામગાનન્દસાનદઃ ।
આબાલ્યનામસારાલીજપત્યક્તવિચારગઃ ॥ ૨૩॥

આનન્દસાગરાપ્લાવસઙ્ગીતજ્ઞાનરાગલીઃ ।
આત્મારામમનોદર્શ આશરદાશુગાશુગઃ ॥ ૨૪॥

ઇહરક્ષાપરાનન્દશ્રીરામરાગસત્કૃતિઃ ।
ઇનવંશાબ્ધિચન્દ્રશ્રીરામબાણગતિસ્તુતિઃ ॥ ૨૫॥

ઈશાનવિનુતશ્રીસીતારામનુતિનામગઃ ।
ઈશામોદનસન્નામતારકાસ્પદપાવનઃ ॥ ૨૬॥

ઉપચારક્રમાગીતમનઃપૂજનરીતિગઃ ।
ઉપચારકુસુમનામસારસરસુસ્વરઃ ॥ ૨૭॥

ઉપચારિપરીતશ્રીરામાવિસ્મૃતિયાચનઃ ।
ઉપચારૈકપાત્રશ્રીરામપ્રેમોક્તિકીર્તનઃ ॥ ૨૮॥

ઉમાભરણરાગસ્વશ્રીરામનિજમર્મગઃ ।
ઉમાવરનુતશ્રીમાવરભાવનકીર્તનઃ ॥ ૨૯॥

ઊષકપ્રશમશ્રીરામભૌલીરાગજાગરઃ ।
ઊષકશ્રીપદશરૂપગાનસૌમ્યકીર્તનઃ ॥ ૩૦॥

ઋષભપ્રિયવાહેશબહુકીર્તનસંસ્તુતિઃ ।
ઋષભારૂઢદારશ્રીનારાયણીનમસ્કૃતિઃ ॥ ૩૧॥

ઋષભપ્રિયરાગશ્રીરામયશોનુકીર્તનઃ ।
ઋષિસઙ્કુલસન્નૂતશ્રીરામભક્તતલ્લજઃ ॥ ૩૨॥

એકાત્મરામરક્ષાર્થસ્વોક્તલોકાપરાધગઃ ।
ઐકાત્મ્યાવહસત્કીર્તનસર્વસ્વપરાત્મગઃ ॥ ૩૩॥

ઓંકારધામરામેડાદિવ્યનામસુકીર્તનઃ ।
ઔજસ્યોંકારનાદપ્રણવાકારસ્વરામગઃ ॥ ૩૪॥

કનકાઙ્ગિગણનાથાઞ્જનેયાવતારનુઃ ।
કનકાભૂષરાજશ્રીગૌરીબહુકૃતિસ્તુતિઃ ॥ ૩૫॥

કનકાદિવિષયદૂરમનઃપક્વબોધનઃ ।
કલિમોચનહરિપૂજનચોદનકીર્તનઃ ॥ ૩૬॥

કમલાપ્તકુલાલોકઃ કમલાપતિરાગગઃ ।
કમલામનઆનન્દહરિનામસુકીર્તનઃ ॥ ૩૭॥

કલશાબ્ધિજરત્નાઙ્ગિમાલક્ષ્મ્યષ્ટસુરૂપનુઃ ।
કરુણાબ્ધિસ્વધનરામનામગઘનસ્વનઃ ॥ ૩૮॥

કલસ્વરપ્રસાદસ્થઃ કલવીણામૃદુસ્વરઃ ।
કલવીણાસસઙ્ગીતકલસ્વરાભિપૂજિતઃ ॥ ૩૯॥

કલકણ્ઠિરમારામકવિતાચ્છવિકીર્તનઃ ।
કલકણ્ઠસ્વરાગીતમાશ્રીજનકજાસ્તુતિઃ ॥ ૪૦॥

કલમાનવતીગીતકથિતસ્વમનોવ્યથઃ ।
કલિમાનવતીર્થશ્રીગઙ્ગાજનકગાયનઃ ॥ ૪૧॥

કલિપીડિતસંશ્રાયગઙ્ગાકીર્તનપાવનઃ ।
કલિદોષનિવારશ્રીકમલાપતિતન્મયઃ ॥ ૪૨॥

કલિદુષ્કૃત્યસદ્ભક્તિલોપાતઙ્કપ્રલાપનઃ ।
કલિસદ્બુદ્ધિદામૂલ્યકૃતિસદ્વસ્તુસાલપઃ ॥ ૪૩॥

કલ્ગડસ્વસુકૃત્યુક્તભક્તિસત્સઙ્ગમાહિનઃ ।
કલ્યન્તરીકસદ્ભક્તિમાર્ગોપદેશકીર્તનઃ ॥ ૪૪॥

કલ્યાર્તિહરનારાયણનામગાનપાવનઃ ।
કલ્યાણરામનામસ્મરણગાનપ્રચોદનઃ ॥ ૪૫॥

કલ્યાણરામગાનાલીનદિવ્યનામકીર્તનઃ ।
કલ્યાણસુન્દરશ્રીરામકારુણ્યસુપાત્રગઃ ॥ ૪૬॥

કલ્યાણસુન્દરાકારહરિસ્વાનુભવારમઃ ।
કલ્યાણીશ્રીરમાનાથકલ્યાણરૂપવર્ણનઃ ॥ ૪૭॥

કલાવતીગસઙ્ગીતશ્રીરામદર્શનોત્સુકઃ ।
કલાવતાનનસ્મેરરાગાનુરાગકીર્તનઃ ॥ ૪૮॥

કલાનિધિકૃતિશ્રીપસ્વબાલ્યસખ્યભાવગઃ ।

કલાનિધિવિભાકોશવંશજપ્રેમસેવકઃ ॥ ૪૯॥

કાલાતીતવરદકાલાતીતકૃતિસાલપઃ ।
કાશીશનુતરામાનૂતિગાવાગીશભાગ્યવાન્ ॥ ૫૦॥

કાકુત્સ્થરાજસવૈદેહીગકાકર્લવંશજઃ ।
કાકુત્સ્થરાજગાનાધિરાજકાકર્લરાજકઃ ॥ ૫૧॥

કામવૈરિનુતસુનામસીતારામરામગઃ ।
કારુણ્યરામરાગાર્થભાવવાગ્જાલકીર્તનઃ ॥ ૫૨॥

કામમોહૈહિકેહાનિન્દનતોડીસુકીર્તનઃ ।
કામિતાર્થપ્રદશ્રીપસઙ્ગીતોપાસનપ્રિયઃ ॥ ૫૩॥

કાન્તામણિરમાકાન્તરક્ષણાર્થનભાષણઃ ।
કાન્તામણિકૃતિશ્રેષ્ઠભક્તિમાર્ગપરાર્થગઃ ॥ ૫૪॥

કાન્તામણિકૃતિસ્વપ્રશ્નદ્વૈતાદ્વૈતમાર્ગગઃ ।
કાલાતીતસસીતાદિમધ્યાન્તરહિતાલપઃ ॥ ૫૫॥

કાપિરાગસુગીતસ્વક્ષમાધર્મનિદર્શકઃ ।
કાપિકૃત્યુક્તસર્વાધ્યાદિપાશબદ્ધમાનસઃ ॥ ૫૬॥

કાપિકીર્તનરાગસ્વરસુધાસારખાણ્ડવ-
-રામનામરસાલીનસૌખ્યાનુભવગાલયઃ ॥ ૫૭॥

કાપિસત્કૃતિસંક્ષિપ્તનામગાધન્યલક્ષણઃ ।
કાનન્દનામમર્મજ્ઞાધન્યશ્શ્રીરામતન્મયઃ ॥ ૫૮॥

કાપિનારાયણીરાગરામચાતુર્યગાયકઃ ।
કાર્યકારણકર્માનુબન્ધવ્યથાવિમોક્તૃગઃ ॥ ૫૯॥

કામ્ભોજિરાગસઙ્ગીતલોલશ્રીરઘુનાથગઃ ।
કામ્ભોજપદરઙ્ગક્ષેત્રાલોકનસુમુત્યગઃ ॥ ૬૦॥

કાનડાનડહાગીતરામનામસુગાસુખી ।
કાનડાપ્રશમાપૂરગુરુશ્રીનારદસ્તુતિઃ ॥ ૬૧॥

કિરણાવલિભૂષાહિવંશજસ્તુતિભૂષકઃ ।
કિરણાવલિકુલદીપહાસપ્રશ્નકીર્તનઃ ॥ ૬૨॥

કીરવાણીસ્વરાગીતમનોગલનકીર્તન-
-પ્રહ્લાદનારદકૃતભક્તિલલાટલેખ્યગઃ ॥ ૬૩॥

કુલદૈવાભિરામાભિમાનાર્થકુઞ્જરીકૃતિઃ ।
કુટિલાલકલાવણ્યસ્વજ્ઞાનદૃષ્ટિસત્કૃતિઃ ॥ ૬૪॥

કુલોદ્ધારસુસીતારામપદભક્તિયાચન-
-પ્રાસાનુપ્રાસસમ્ભાસહુસેનીરાગકીર્તનઃ ॥ ૬૫॥

કૂર્મમત્સ્યાદિદશરૂપશ્રીરામસુકીર્તિગઃ ।
કૂજિતારામરામનામશ્રીકરસુકીર્તનઃ ॥ ૬૬॥

કૃતકૃત્યસદયરામનામગાનકાલજિત્ ।
કૃતિરત્નસ્વદૃઢભક્તિપ્રમાણોપદેશગઃ ॥ ૬૭॥

કેદારગૌલસઙ્ગીતવેણુગાનસ્વરાકૃતિઃ ।
કેદારરાગગીતસ્વરામપ્રેમરસાનુતિઃ ॥ ૬૮॥

કેશવાનુજનારાયણીનુકીર્તનગાસરઃ ।
કેસરીરાગસત્કીર્તનગઙ્ગાપ્રશમાવહઃ ॥ ૬૯॥

કૈકવશીસુરાગાવર્ણનીયરામવર્ણનઃ ।
કૈકવશીકૃતિશ્રીરામબાણદક્ષતાનુતિઃ ॥ ૭૦॥

કોકિલધ્વનિરામપૃષ્ટપૂર્વપૂજનાફલઃ ।
કોકિલધ્વનિરાગસ્વરામાસક્તિસુગાયનઃ ॥ ૭૧॥

કોકિલારવમાધુર્યનાનાભાવરસાનુતિઃ ।
કોસલારામરામસ્વપ્રેમાનન્દાઢ્યસત્કૃતિઃ ॥ ૭૨॥

કોકિલસ્વાદુગીતસ્વરામામૃતકથારસઃ ।
કોદણ્ડરામમાધુર્યભાષણામિષ્ટગાયનઃ ॥ ૭૩॥

કોદણ્ડરામસર્વોત્કૃષ્ટાવતારગકીર્તનઃ ।
કોલાહલરસસ્વાદુવાગ્રામગાનસત્કૃતિઃ ॥ ૭૪॥

કોદણ્ડકોટિકોટ્યાપગાવાસજ્ઞાનકીર્તનઃ ।
કોદણ્ડપાણિનાદોપાસનપ્રત્યૂષગાનુતિઃ ॥ ૭૫॥

કૌશલ્યાપુત્રકામારિમિત્રરક્ષાઽભયાર્થનઃ ।
કૌશિકાહવરક્ષાગ્રદર્શભક્તાગ્રભાગ્યવાન્ ॥ ૭૬॥

ક્રૂરરાક્ષસમદશિક્ષકનામગુણારમઃ ।
ક્રૂરમાનવદારિશ્રીહરિરક્ષાર્થનામગઃ ॥ ૭૭॥

ક્ષિતિનાથાર્થિતશ્રીસીતાપ્રાપ્તાનન્દસૌખ્યગઃ ।
ક્ષિતિજાપ્રાપ્તરામપ્રેમરસાર્થનકીર્તનઃ ॥ ૭૮॥

ક્ષીરાબ્ધિદેવગાંધારી ક્ષીરાન્નનુનિવેદનઃ ।
ક્ષીરાબ્ધિકન્યકારામગારાગફલમઞ્જરિઃ ॥ ૭૯॥

ખગવાહનહૃદયાલયસત્કવિતલ્લજઃ ।
ખગઙ્ગાપૂતવાક્સારમનઃપાવનકીર્તનઃ ॥ ૮૦॥

ખંદદાચ્યુતસન્નામસઙ્કુલાગાનસારમઃ ।
ખંદદસ્વરવિદ્યાબ્ધિમર્મજ્ઞાનાદકોવિદઃ ॥ ૮૧॥

ખરહરપ્રિયાકીર્તનભક્તિરાજમાર્ગણીઃ ।
ખરારિરામહૃદ્ગ્રાલનભક્તિઘનકીર્તનઃ ॥ ૮૨॥

ખાણ્ડવસ્વાદુભાષશ્રીરામાનુભવગાયનઃ ।
ખાણ્ડવસ્વાદુવાગ્રાગરામસુસ્વરરાસગઃ ॥ ૮૩॥

ગરુડારૂઢપરવાસુદેવાર્થનકીર્તનઃ ।
ગરદાશનવાહશ્રીવિષ્ણુસન્નુતિકીર્તનઃ ॥ ૮૪॥

ગઙ્ગાહમીરકલ્યાણીપૂતવાક્કીર્તનાલપઃ ।
ગમનશ્રમવાહજ્ઞાનગઙ્ગીભૂતકીર્તનઃ ॥ ૮૫॥

ગમ્ભીરવાણિસન્નાદસદાશિવવરાનુતિઃ ।
ગમ્ભીરનાદસદ્વાણીધારાસારસુગારસઃ ॥ ૮૬॥

ગમ્ભીરવાણિસન્નાટસીતારામસુકીર્તનઃ ।
ગમ્ભીરનાટસદ્વાણીભજનોત્તમગાયનઃ ॥ ૮૭॥

ગાકોકિલવરાલ્યુક્તરામસાન્નિધ્યમાહિનઃ ।
ગાનોક્તાનન્યભક્ત્યન્યદુર્લભ્યરામસન્નિધિઃ ॥ ૮૮॥

ગાબિન્દુમાલિનીનૂતાવાચ્યશોભધુરીણસઃ ।
ગાનનિન્દિતકામાન્વિતભાગવતવેષધૃક્ ॥ ૮૯॥

ગાનનન્દિતકમનીયતનુર્જિતકામસઃ ।

ગાનવન્દિતવીક્ષાઽસાધ્યલાવણ્યસ્વરામકઃ ॥ ૯૦ ॥

ગાઙ્ગેયભૂષણીરાગાસમાનરામકીર્તનઃ ।
ગાનગાઙ્ગેયકીર્તનાભૂષરામરક્ષણાનુતિઃ ॥ ૯૧ ॥

ગાનમૂર્તિયદુશ્રેષ્ઠદયાર્થગાનવારિધિઃ ।
ગાવેગવાહિનીશૈલીપ્રાસાનુપ્રાસલાઘવઃ ॥ ૯૨ ॥

ગાગઙ્ગાકન્નઙહરાગાર્થવાઙ્લયજાલકઃ ।
ગારાગનવરસકન્નઙરામસ્વસર્વગઃ ॥ ૯૩ ॥

ગાધિયાગસુસંરક્ષકરાઘવનિવેશહૃત્ ।
ગાનન્દકન્દપરમાર્થમાધવસ્વજીવનઃ ॥ ૯૪ ॥

ગાનલોલવરશ્રીજાનકીરમણગાનનુઃ ।
ગાનશ્રોત્રોત્સવસ્વાદુહરિનામપરસ્કૃતિઃ ॥ ૯૫ ॥

ગાનાગનન્દિનીગૌરીપ્રાણેશનન્દનસ્વનઃ ।
ગાનનાગસ્વરાલીનનામતારકમન્ત્રતઃ ॥ ૯૬ ॥

ગિરિનન્દિનિસદ્ગઙ્ગાનિભકીર્તનનન્દનઃ ।
ગિરિનન્દિનિગૌરીનુકૃતિરત્નઘનાઘનઃ ॥ ૯૭ ॥

ગિરિજારમસંમિષ્ટકીરવાણીસુનામગઃ ।
ગિરિજારમણપ્રીતનામતારકગાવ્રતઃ ॥ ૯૮ ॥

ગિરિધારિમધુરવેણુગાનખેલનારમઃ ।
ગિરિધાર્યભિલોલસ્વાદુવેણુગાજયસ્વરઃ ॥ ૯૯ ॥

ગિરિદર્શિતરામસ્વસહાનાકૃતિદર્શકઃ ।
ગિરિરાજનદીવાહગિરામાધુર્યકીર્તનઃ ॥ ૧૦૦ ॥

ગિરીશદેવસશ્રીરામાવતારરહસ્યગઃ ।
ગિરીશચાપખણ્ડશ્રીરામસુપ્રાસપૂર્ણગઃ ॥ ૧૦૧ ॥

ગિરીશવિનુતશ્રીરામભક્તિગતચિન્તનઃ ।
ગિરીશવરગઙ્ગાધરગાગઙ્ગાધરસ્તુતિઃ ॥ ૧૦૨ ॥

ગીર્વાણમુનિવન્દ્યશ્રીરામૈકગતિગાયનઃ ।
ગીતપ્રિયપ્રિયાગીતદિવ્યનામસુકીર્તનઃ ॥ ૧૦૩ ॥

ગીતાર્થભાવપુષ્ટિજ્ઞવાતાત્મજપ્રિયાનુતિઃ ।
ગીતાનન્દમનોજ્ઞાતવાતાત્મજસુગાનુતિઃ ॥ ૧૦૪॥

ગુર્વત્યવશ્યતાબોધગૌરીમનોહરીકૃતિઃ ।
ગુરુમાહિનતત્ત્વાર્થજ્ઞાનબોધનસત્કૃતિઃ ॥ ૧૦૫॥

ગુણાતીતવરાલીનગુરુસત્ત્વગુણાસ્પદઃ ।
ગુર્જરીગીતસદ્ભક્તિઘનવૈરાગ્યમાનસઃ ॥ ૧૦૬॥

ગૂઢોત્મરામનામસ્મરણસૌખ્યસુકીર્તનઃ ।
ગૂઢનાદરહસ્યોપદેશસુજ્ઞાનકીર્તનઃ ॥ ૧૦૭॥

ગૃહદૈવત્યરામસ્વબહુકીર્તનલાલનઃ ।
ગૃહદૈવત્યમત્સ્વામી બહુશ્લોકિતસદ્ગુરુઃ ॥ ૧૦૮॥

ગેયગાઙ્ગેયગઙ્ગશ્ચ ગેયરામનિદર્શકઃ ।
ગેયગામ્ભીર્યનાટશ્રીરાગચ્છવિલયધ્વનિઃ ॥ ૧૦૯॥

ગૈરિકીગઙ્ગિકાવાહપૂર્ણાનન્દસુગેયતઃ ।
ગોવિન્દનામસઙ્કીર્તનાનન્દરાગસઁલ્લયઃ ॥ ૧૧૦॥

ગૌરીકરશુકાલાપમનોરઞ્જનનામગઃ ।
ગૌરીપતિસુખાજસ્રરામનામદિનોત્સવઃ ॥ ૧૧૧॥

ગૌરીકૃતિમનોવેદનશ્રીરામનિવેદનઃ ।
ગૌરીગુરુશિરોધારગઙ્ગાપ્રવાહનામગઃ ॥ ૧૧૨॥

ગૌલરાગમનોવીણામન્દ્રસ્થાયિસ્વરાલયઃ ।
ગૌલકીર્તનલોકાપરાધસ્વકૃતગાયનઃ ॥ ૧૧૩॥

ગૌલસઞ્ચારનારાયણદિવ્યનામગાચરઃ ।
ગૌલશ્રીરામદૈવત્યરસવર્ણનલાલિગઃ ॥ ૧૧૪॥

ઘણ્ટાગગોપિસંભાષવજવર્ષભયાનકઃ ।
ઘણ્ટારવગલસ્વાદુગીતશ્રીકૃષ્ણનાટકઃ ॥ ૧૧૫॥

ઘુષિતાદ્ભુતનામશ્રીરામતારકકીર્તનઃ ।
ઘૂર્ણમાનસસંસાન્ત્વપ્રશાન્તલયકીર્તનઃ ॥ ૧૧૬॥

ઘૃણાપાઙ્ગૈકગતિવિશ્વાસપાદાબ્જસેવનઃ ।
ઘૃણાપાઙ્ગપ્રિયાલાપશ્રોત્રદર્શનભાગ્યવાન્ ॥ ૧૧૭॥

ઘૃણિવંશપ્રભાવસ્વાદુઘૃતશ્લક્ષ્ણકીર્તનઃ ।
ઘૃતશ્લક્ષ્ણસ્રવસ્વાદુનામઘોરણનાટગઃ ॥ ૧૧૮॥

ઘોરમારીચહારામલલાટાલકકાન્તિગઃ ।
ઘોરસંસારતારૈકસારશ્રીરામનામગઃ ॥ ૧૧૯॥

ઘોરપાતકમૂલચ્છિન્નામતારકસાલયઃ ।
ઘોરપાતકદારિશ્રીક્ષીરસાગરનામગઃ ॥ ૧૨૦॥

ચન્દ્રસૂર્યસુનેત્રશ્રીરામનામસુરક્ષગઃ ।
ચન્દ્રજ્યોતિર્લસત્કૃષ્ણનરાર્જુનોક્તિગાયનઃ ॥ ૧૨૧॥

ચન્દ્રાસ્યાર્થિતપૂજાહડમ્ભમારીચહારગઃ ।
ચન્દ્રજ્યોતિસુકૃત્યર્થનૈત્યયાગાભિરક્ષણઃ ॥ ૧૨૨॥

ચન્દ્રાસ્યબાલ્યમુનિયાગરક્ષાતિશૌર્યાનુતિઃ ।
ચન્દ્રાલોકહૃદબ્જાલોકબ્રહ્માનન્દગાનતઃ ॥ ૧૨૩॥

ચરાચરાત્મકશ્રીરાઘવસર્વસ્વતત્ત્વવિત્ ।
ચણ્ડભાસ્કરવંશાબ્ધિચન્દ્રરક્ષિતપુણ્યવાન્ ॥ ૧૨૪॥

ચારુકેશીસુગીતશ્રીરામભાષણલાલસઃ ।
ચારુશૈલીસુવાક્સખ્યભાવૈકરામભક્તિગઃ ॥ ૧૨૫॥

ચારુવાગ્રામસત્પાદનૈજભક્તિદૃઢગ્રહઃ ।
ચારુરાગસ્વરારામરામપાદગપૂજનઃ ॥ ૧૨૬॥

ચારુકીર્તનરામપ્રેમમાહિનાભયોક્તિગઃ ।
ચારુનેત્રરઘુવરાર્થનતારકનામગઃ ॥ ૧૨૭॥

ચિત્તશ્રીરાઘવસમીક્ષણોત્તમસુખસ્થિતઃ ।
ચિત્તશ્રીરાઘવસ્વાન્તરાત્મદૃક્સુખફુલ્લહૃત્ ॥ ૧૨૮॥

ચિત્તપૂરિતહરિદાશરથીસર્વદર્શનઃ ।
ચિત્તપૂજિતરામસ્વભક્તિસઙ્ગીતમોદનઃ ॥ ૧૨૯॥

ચિદમ્બરશુભાકારદિવ્યનામગચિલ્લયઃ ।
ચિદ્વિલાસવરગુણશ્રીવાસુદેવસન્નુતિઃ ॥ ૧૩૦॥

ચેતનાચેતનવ્યાપિશ્રીરામસર્વદર્શનઃ ।

ચૈતન્યપરરામજ્ઞાનઘનબહુકીર્તનઃ ॥ ૧૩૧॥

છન્દ્રસીતાપવન્દ્રસ્વનાદોપાસનસઁલ્લયઃ ।
છન્દસ્કૃતાભિવન્દ્યશ્રીસદ્ગુરુસ્વામિદૈવતઃ ॥ ૧૩૨॥

છાયાતરઙ્ગિણીગાસ્વહૃત્સ્થરામકૃપાર્થનઃ ।
છાયાતરઙ્ગિણીગઙ્ગારાગસંલાસ્યસત્કૃતિઃ ॥ ૧૩૩॥

છાયાચ્છાયાલસદ્ભઙ્ગાચ્છવિશૈલીસુવાચકઃ ।
છાયાવૃતસુકન્નાટચ્છવિગઙ્ગાસુકીર્તનઃ ॥ ૧૩૪॥

છાયાકોશેનવંશેનશ્રીરામાગ્રનિવેદનઃ ।
છાયાનાટકૃતિસ્વોક્તકલિનાટકવિદ્રવઃ ॥ ૧૩૫॥

છાયાનાટચ્છવિસ્મેરવાગ્રાસરસગાયનઃ ।
છાયાસ્વરૂપરામાવાસહૃદ્ભઙ્ગાપવિત્રતઃ ॥ ૧૩૬॥

છાયાગઙ્ગાસુપુણ્યામગ્નશિષ્યહૃત્સુવાસનઃ ।
છાયાગઙ્ગાસુનામસ્વશિષ્યાગૃહાતિદૈવતઃ ॥ ૧૩૭॥

છિદ્રહૃચ્છમનશ્રીરામભદ્રશરણાગતઃ ।
છિદ્રહૃચ્છરણાગન્તુશિષ્યાર્તિહરસદ્ગુરુઃ ॥ ૧૩૮॥

જઙ્ગમસ્થાવરવ્યાપિરઘુવીરહુસેનિગઃ ।
જયરામનુતિપ્રાસાનુપ્રાસલસકીર્તનઃ ॥ ૧૩૯॥

જગદાનન્દકારશ્રીરામગાયકતલ્લજઃ ।
જયજાનક્યતિપ્રેષ્ઠપ્રાણનાયકવલ્લભઃ ॥ ૧૪૦॥

જયનારાયણીકૃત્યર્થિતભક્તમનોહરઃ ।
જયરામસ્વસૌભાગ્યગાનાતિમિષ્ટદિવ્યગઃ ॥ ૧૪૧॥

જયનારાયણીરામરામનામસુકૂજનઃ ।
જયનારાયણીજાનિજપ્તતારકગાયકઃ ॥ ૧૪૨॥

જયન્તશ્રીકૃતિસ્વાન્તર્ગલનવાગ્રાઘવાર્થનઃ ।
જયન્તશ્રીનુતસ્વાન્તરઙ્ગજ્ઞસર્વરાઘવઃ ॥ ૧૪૩॥

જયરામસુનામસ્વાદુગાસ્વાર્તિનિવેદનઃ ।
જયકારસુનામશ્રીસીતારામનુકીર્તનઃ ॥ ૧૪૪॥

જગન્મોહનરામાવતારમાહિનગાયનઃ ।
જગદુદ્ધારરામસ્વાદુગાનજગદુદ્ધરઃ ॥ ૧૪૫॥

જગદુદ્ધારણાતુલ્યનામગાતુલ્યભાવુકઃ ।
જગદાત્મસ્વગત્યૈકશ્રીરામનામસારગઃ ॥ ૧૪૬॥

જપ્તરામસુપાદગ્રાહતનુર્માનસાર્પણઃ ।
જગત્સ્વરૂપરામસ્વસર્વસ્વભાવનાકૃતિઃ ॥ ૧૪૭॥

જપયોગસુનિષ્ઠાપરાનન્દરામનામલીઃ ।
જપસ્મરણનામપ્રેમનિષ્કામમનોરમઃ ॥ ૧૪૮॥

જપ્તનામસ્મરાદર્શમનઃપ્રત્યક્ષરામકઃ ।
જનરઞ્જનિગારામનામસ્મરસુખાલપઃ ॥ ૧૪૯॥

જનરઞ્જનિગીતસ્વબાલ્યશ્રીરામભાષણઃ ।
જનરઞ્જનરામસ્વભક્તિસાગરપારદૃક્ ॥ ૧૫૦॥

જાજીસરોજનાનાસુમાભિવર્ષિતરામકઃ ।
જાનકીજાનિગત્યૈકગદિવ્યનામકીર્તનઃ ॥ ૧૫૧॥

જાનકીનાયકસ્વાદુધન્યાસીમઙ્ગલારતિઃ ।
જાહ્નવીવરગઙ્ગાસ્નાનરામધ્યાનગાકૃતિઃ ॥ ૧૫૨॥

જિજ્ઞાસુશ્રાયસદ્બોધબહુરાગસુકીર્તનઃ ।
જિહ્વામિષ્ટસુનામશ્રીરામરાગોપચારગઃ ॥ ૧૫૩॥

જિતરામાર્થનસુમાધુર્યવાક્સારકીર્તનઃ ।
જિતકામસુહૃત્કામજિતકામમહામુનિઃ ॥ ૧૫૪॥

જીવન્તિનીકૃતિસ્વાનન્યચિત્તશરણાગતિઃ ।
જીવસ્ફૂર્તિકરાનન્યભક્તિપ્રમાણસત્કૃતિઃ ॥ ૧૫૫॥

જીવહેમવતીગઙ્ગાનિભજીવનકીર્તનઃ ।
જીવનાવિરતધ્યાતપદાનુપમરામગઃ ॥ ૧૫૬॥

જીવાધારસ્વજપમન્ત્રસ્વરૂપપરાત્મગઃ ।
જીવશક્તિસ્ફુરદ્ગાનપ્રાણસંત્રાણસદ્ગુરુઃ ॥ ૧૫૭॥

જીવનાધારરામાવિસ્મૃતસાત્ત્વિકજીવનઃ ।
જીવબ્રહ્મૈક્યતત્ત્વાર્થબહુકીર્તનસૂચનઃ ॥ ૧૫૮॥

જયાજાવરવરપ્રાસજ્વલદીડનકીર્તનઃ ।
જયાચિષ્ટરામશબ્દાર્થચ્છવિરાસસુકીર્તનઃ ॥ ૧૫૯ ॥

ઝઙ્કારધ્વનિગામ્ભીર્યફણિનાથસુતલ્પગઃ ।
ઝઙ્કારશ્રુતિહ્રીઙ્કારસઙ્ગીતોપાસનાયુતઃ ॥ ૧૬૦ ॥

ઝઞ્જૂતિકૃતિસંદૃશ્યવૈરાગ્યૈકાન્તભક્તિ-
-સુજ્ઞાનપક્વાન્તરઙ્ગાદ્વૈતમનોભાવસદ્ગુરુઃ ॥ ૧૬૧ ॥

જ્ઞાનકેદારસર્વસ્વરામચિન્તનતન્મયઃ ।
જ્ઞાનકેદારનાદયોગરામૈકાન્તચિલ્લયઃ ॥ ૧૬૨ ॥

જ્ઞાનકેદારસંસ્રાવભક્તિગઙ્ગાસુકીર્તનઃ ।
જ્ઞાનાર્થનસુપૂર્વીકલ્યાણીકીર્તનબોધધિઃ ॥ ૧૬૩ ॥

જ્ઞાનસદ્બોધશ્રીકૃષ્ણગીતાસારસુકીર્તનઃ ।
જ્ઞાનસદ્ભક્તિસઙ્ગીતસન્માર્ગદર્શકોત્તમઃ ॥ ૧૬૪ ॥

ટઙ્કારજ્યાઘુષશ્રીરામબાણત્રાણશૌર્યગઃ ।
ટાઙ્કારઘોષકોદણ્ડસાવેરીરાગવર્ણનઃ ॥ ૧૬૫ ॥

તન્ત્રીલયસ્વરવિલોલનાદોપાસનાયુતઃ ।
તન્ત્રીરાગલયાલીનનાદોપાસિતસદ્ગુરુઃ ॥ ૧૬૬ ॥

તપસ્તીર્થપુરામ્બાભ્રાતૃદયાપાત્રચારુગઃ ।
તરુણારુણચરણાર્પણતારકમઙ્ગલઃ ॥ ૧૬૭ ॥

તરણીન્દ્વક્ષસીતાવરવંશધનજીવનઃ ।
તરણ્યન્વયપરમાર્થરામવસપૂતહૃત્ ॥ ૧૬૮ ॥

તારકધ્યાનસઁલ્લીનદિવ્યનામસુકીર્તનઃ ।
તારકાધિપવક્ત્રશ્રીરામતારકતારણઃ ॥ ૧૬૯ ॥

તિતીર્ષુશ્રાયગઙ્ગીભૂતતીર્થતમકીર્તનઃ ।
તિમિરાવૃતશિષ્યાન્તર્જ્યોતિઃપૂરકકીર્તનઃ ॥ ૧૭૦ ॥

તીર્થીભૂતમનઃપક્વનિદર્શબહુકીર્તનઃ ।
તીવ્રગઙ્ગાગતિસ્વાશુનામધોરણકીર્તનઃ ॥ ૧૭૧ ॥

તુલસીદલસૌગન્ધ્યસુમપૂજનતોષિતઃ ।

તુલસીબિલ્વપૂજાર્ચિતાનન્દનિરુપાધિકઃ ॥ ૧૭૨॥

તુમ્બુર્વનિલજશ્રીનારદાનન્દસુખસ્વકઃ ।
તુમ્બરાનાદનામારામગાહરિસમર્પણઃ ॥ ૧૭૩॥

તૂષ્ણીકમાનસાદૃષ્ટસંભાષિતસ્વરામકઃ ।
તૂષ્ણીંભાવમનોનાદપ્રણવાકારસઁલ્લયઃ ॥ ૧૭૪॥

તૃપ્તિસંતુષ્ટિસદ્બોધબહુકીર્તનરત્નકઃ ।
તૃપતદ્યુતિલાવણ્યરામમોહનમોહિતઃ ॥ ૧૭૫॥

તેજોવિગ્રહરામધ્યાનનામભજનાલયઃ ।
તેજસ્કરહરિભજનગાગ્રહબલાપહઃ ॥ ૧૭૬॥

તૈર્થિકસ્વાદુગાનધ્યાનગઙ્ગાસ્નાનમાહિનઃ ।
તૈર્થિકસ્વકૃતિશ્લક્ષ્ણવાગ્ધારાગાનગઙ્ગિકઃ ॥ ૧૭૭॥

તોડીસત્કૃત્યુષોગાનતથ્યોપાસનબોધનઃ ।
તોડીકીર્તનસાલાપહરિપૂજનસત્ક્રમઃ ॥ ૧૭૮॥

તોયજારિમુખશ્રીસીતાકાન્તભૈરવીનુતિઃ ।
તોયાલયોર્મિનટસઙ્ગતિશૃઙ્ખલચારુગઃ ॥ ૧૭૯॥

તૌષારાદ્રિમનસ્સ્થૈર્યજ્ઞાનગઙ્ગાસુકીર્તનઃ ।
તૌષારાચલગઙ્ગાશૈશિરસૌખ્યદકીર્તનઃ ॥ ૧૮૦॥

ત્યાગરાજગુરુસ્વામી ત્યક્તસઙ્ગહરિસ્મરઃ ।
ત્યાગયાગસ્વયોગશ્રીરામોપાસનરાગગઃ ॥ ૧૮૧॥

ત્રિગુણાતીતરામસ્વસગુણોપાસનાનુતિઃ ।
ત્રિતાપરહિતાર્ચાલોપતાપોદ્ભવસત્કૃતિઃ ॥ ૧૮૨॥

દમાદિશમગુણગઙ્ગાસ્નાનસુખસંસ્થિતઃ ।
દક્ષશિક્ષકસન્નૂતવરલીલનુગાનતઃ ॥ ૧૮૩॥

દર્ભારિસૂદનાસ્ત્રશ્રીરામશૌર્યગવિસ્મયઃ ।
દમનાદ્ભુતશૌર્યશ્રીરામસદ્ગુણગાયનઃ ॥ ૧૮૪॥

દાસપોષકસીતાપતિસ્વાર્તિગાનિવેદનઃ ।
દાસાર્તિહરરામજ્ઞસત્સહવાસચોદનઃ ॥ ૧૮૫॥

દિગમ્બરપદામ્ભોજાર્ચનસુનામકીર્તનઃ ।
દિવ્યલાવણ્યરામાભૂષણગાઙ્ગેયકીર્તનઃ ॥ ૧૮૬ ॥

દિવ્યકુલોત્તમપ્રશ્નકૃતિભાવાઢ્યગાયનઃ ।
દિનાન્વયતિલકલાવણ્યરાગાઢ્યગાયનઃ ॥ ૧૮૭ ॥

દીપકસ્તુતિસઙ્ગીતસર્વકારણરાઘવઃ ।
દીપકારતિસત્કીર્તનસીતાપતિરાધનઃ ॥ ૧૮૮ ॥

દીક્ષાગુરુસ્વરામપ્રદક્ષિણાહ્વાનકીર્તનઃ ।
દીનાવનરમારામદશરૂપાવનાનુતિઃ ॥ ૧૮૯ ॥

દુન્દુભીતરવાદ્યૌઘસન્નાદવેદઘોષસ-
-સપ્તસ્થાનોત્સવામિષ્ટપૃથુકીર્તનવર્ણનઃ ॥ ૧૯૦ ॥

દુઃખવારણસઙ્ગીતમાહાત્મ્યબહુકીર્તનઃ ।
દુરિતેભહરિશ્રીપહરિકીર્તનદુઃખહા ॥ ૧૯૧ ॥

દૂષણાહરણશ્રીભૂજેશ્વરહરિકીર્તનઃ ।
દૂરીકૃતાજ્ઞસુજ્ઞાનઘનગાનહરિસ્વરઃ ॥ ૧૯૨ ॥

દૃષ્ટશ્રીરામસંતોષહર્ષપ્રવાહકીર્તનઃ ।
દૃશ્યમઙ્ગલરૂપશ્રીરામવર્ણનગાયનઃ ॥ ૧૯૩ ॥

દૃષ્ટસભ્રાતૃહનુમત્સીતાકાન્તદયાર્થનઃ ।
દૃષ્ટરામમનશ્ચક્ષુરન્તર્લયસુગાયનઃ ॥ ૧૯૪ ॥

દેવગાંધારિરાગશ્રીક્ષીરસાગરશાયનઃ ।
દેવગાન્ધર્વસઙ્ગીતસર્વલોકવશીકરઃ ॥ ૧૯૫ ॥

દેવતાસાર્વભૌમશ્રીરામગાસાર્વભૌમિકઃ ।
દેવાદિમૃગ્યહરિગેહસ્વહૃદ્દર્શસન્મુનિઃ ॥ ૧૯૬ ॥

દેવદેવાર્ચિતશ્રીસીતારામવાગ્ઘનાર્થનઃ ।
દેવાધ્યક્ષરઘુવરશ્રીરામનામધોરણિઃ ॥ ૧૯૭ ॥

દેવમાધવશિવમન્ત્રજીવરામમન્ત્રગઃ ।
દેવામૃતકવર્ષસ્વશૈલીરાગલયાદ્ભુતઃ ॥ ૧૯૮ ॥

દૈત્યવિદારરામાવિસ્મૃતિચોદનદિવ્યગઃ ।
દૈવશ્રીરામમાહાત્મ્યગદિવ્યનામકીર્તનઃ ॥ ૧૯૯ ॥

દૈનારાધનનાદોપાસનસેવિતરામકઃ ।
દૈનારમ્ભાન્તરશ્રીરામપૂજાન્ચુઙ્ખકીર્તનઃ ॥ ૨૦૦॥

દોલોત્સવસુદિવ્યાલાપલાલિગાભિનન્દનઃ ।
દોષાર્તિહરરામેડનદિવ્યવાક્સુકીર્તનઃ ॥ ૨૦૧॥

દૌર્મનસ્યાપહશ્રીરામોત્સવસેવનોત્સુકઃ ।
દૌર્ગ્યાપહાગમનિગમાર્થસારસુગાયનઃ ॥ ૨૦૨॥

દ્યુતિનિર્જિતકામશ્રીરામપૃષ્ટદયાહ્રુતિઃ ।
દ્યુતિવિદ્યુત્પ્રભાપ્રાસહાસ્યાનુવિદ્ધવાક્કૃતિઃ ॥ ૨૦૩॥

દ્યોતિતસ્વહૃદયહરિનામજપભાસુરઃ ।
દ્યોતિતસ્વરમર્મગ્રન્થસ્વરાર્ણવકીર્તનઃ ॥ ૨૦૪॥

દ્રાક્ષારસકૃતિભજનમોહિતસ્વરામકઃ ।
દ્રૌપદીમાનરક્ષાર્થનિન્દાસ્તુત્યારભીકૃતિઃ ॥ ૨૦૫॥

દ્વારકાનિલયાહ્વાનશરણાગતરક્ષગઃ ।
દ્વારકાનિલયસ્વાર્ત્યુક્તમનોગાલકીર્તનઃ ॥ ૨૦૬॥

દ્વિરદાદ્ભુતગમનાલોકગાનમનોહરઃ ।
દ્વિકરશ્રીપવાક્પ્રાસધારાસારાભિવર્ષણઃ ॥ ૨૦૭॥

દ્વિકરેહપરાર્થશ્રીરામભક્તિપ્રમાણગઃ ।
દ્વૈતાદ્વૈતનિજજ્ઞાનતત્ત્વાર્થબોધગાયનઃ ॥ ૨૦૮॥

ધરાવતારરામસ્વગાનેડાર્થાવતારકઃ ।
ધરણીતનયાર્થશ્રીરામપ્રેમરસાર્થનઃ ॥ ૨૦૯॥

ધનુર્વિદ્યાતિશૂરશ્રીરામનૈપુણ્યશંસનઃ ।
ધનુર્ભઙ્ગરઘુવરશ્રીરામશૌર્યવિસ્મયઃ ॥ ૨૧૦॥

ધન્યાસીતાસમેતશ્રીરામમઙ્ગલગાયનઃ ।
ધન્યનિર્મલચિત્તશ્રીરામસ્વગુરુમાનિતઃ ॥ ૨૧૧॥

ધારાધરાભગાત્રશ્રીરામતારકધારણઃ ।
ધાર્યશ્રીરામસન્નામસંસારવનતારકઃ ॥ ૨૧૨॥

ધિષણ્યકીર્તનરામોપાસનજીવનસદ્ગુરુઃ ।

ધીરમેરુસમાનશ્રીરઘુવીરસુસારગઃ ॥ ૨૧૩॥

ધુનિગઙ્ગાજલસુપાદધ્યાનહરિપૂજનઃ ।
ધૂપદુષ્કર્મફલદીપભક્ત્યુપાસનાવિધિઃ ॥ ૨૧૪॥

ધૃતચક્રહરિશ્રીપનુતિકીર્તનરત્નકઃ ।
ધૃતમાનસધૃતરામપદૈકગતિશ્રયઃ ॥ ૨૧૫॥

ધેનુકાકૃતિવિલપિતાજ્ઞાતભક્તિવેષધૃત્ ।
ધેયસદ્ભક્તિકૃતિરામનામમહિમાલયઃ ॥ ૨૧૬॥

ધૈર્યરૂપકસીતાકલત્રહાસ્યરસાનુતિઃ ।
ધોરણીનામધારાધૌતીગઙ્ગાવેગકીર્તનઃ ॥ ૨૧૭॥

ધ્યાનદેવનદીસ્નાનધન્યાસિકૃતિગાયનઃ ।
ધ્યાનસ્મરણસુખરામનામાનુભવાલયઃ ॥ ૨૧૮॥

ધ્રુવસત્ફલદશ્રીરામૈકભક્તિપ્રમાણકઃ ।
ધ્રુવપ્રહ્લાદદૃષ્ટાન્તસદ્ભક્તિશક્તિગાયનઃ ॥ ૨૧૯॥

નટનાલોકરામોક્તિકૃતિદેવક્રિયાલપઃ ।
નટદેવક્રિયારાગમધુવાણિસુકીર્તનઃ ॥ ૨૨૦॥

નટરાજવિનુતવિશ્વાસસંદૃશ્યકીર્તનઃ ।
નશ્વરૈહિકદૂરશ્રીરામપ્રશ્નબ્ધિપૂરિતઃ ॥ ૨૨૧॥

નરદેવમનોહારિકૃતિરામાવતારનુઃ ।
નવમન્મથકોટિસ્વરૂપરામદયાર્થનઃ ॥ ૨૨૨॥

નરાનન્દરમારમ્યચિત્તાલઙ્કરણારમઃ ।
નરવેષકૃતિસ્તોમનન્દનન્દનનન્દનઃ ॥ ૨૨૩॥

નવ્યસત્કૃતિનૂતશ્રીજાનકીકલકણ્ઠિની ।
નવ્યવર્ણનપદનીરાજનચિત્તહારકઃ ॥ ૨૨૪॥

નવનીતકૃતિસ્તોત્રરામદૈનનિવેદનઃ ।
નવનીતસુનૈવેદ્યસ્વાતઙ્કૃતિસાર્પણઃ ॥ ૨૨૫॥

નવગ્રહબલાપોહરામાનુગ્રહશક્તિગઃ ।
નવગ્રહવ્યથાપોહહરિધ્યાનપ્રચોદનઃ ॥ ૨૨૬॥

નાગધારિનુતશ્રીપપદચિન્તનજીવનઃ ।
નાગસ્વરાવલીશ્રીપાર્થિતસ્વાર્તિનિવારણઃ ॥ ૨૨૭॥

નાગાધિપવિનુતનામસારવર્ષસન્નુતિઃ ।
નાગારિરથપદભક્તિદરક્ષણશક્તિગઃ ॥ ૨૨૮॥

નાગનન્દિનિરાગપ્રલાપિતકલિદુર્ગતિઃ ।
નાગમોચકવિલપનભક્તિલોપદુષ્કૃતિઃ ॥ ૨૨૯॥

નાગરાજસુપાલશ્રીરાઘવાનુતિવન્દનઃ ।
નાગરાટ્શાયિગાયસ્વહાસ્યાનુવિદ્ધકીર્તનઃ ॥ ૨૩૦॥

નાગભૂષસતીનિષ્કામચિત્તવરદાનુતિઃ ।
નાસિકાભૂષણીગૌરીધર્મસંવર્ધનીસ્તુતિઃ ॥ ૨૩૧॥

નાગગાંધારિરાગપ્રહ્લાદોક્તિસ્વમનઃસ્થિતિઃ ।
નામગારામસર્વોન્નતૈકસત્યોક્તસન્મુનિઃ ॥ ૨૩૨॥

નાગાચલનિલયવેઙ્કટેશપદસેવનઃ ।
નામગાભાગવતપ્રિયશ્રીનાયકગાયનઃ ॥ ૨૩૩॥

નાટસત્કીર્તનાગીતજગદાનન્દકારકઃ ।
નાટરાગલયાલાસ્યગતિગાંભીર્યહારકઃ ॥ ૨૩૪॥

નાટકીર્તનસમ્ભાસવાગ્વિશેષાર્ચનાવલિઃ ।
નાટનામસુધાગાનનાદાર્ચનમુદાનુતિઃ ॥ ૨૩૫॥

નાદરૂપદયાભાગ્યરીતિગૌલસુગીતિગઃ ।
નાગનાથશયદયાશઙ્કુતારકબોધગઃ ॥ ૨૩૬॥

નાદનામક્રિયાયોગવરિવસ્યાદિનાચરઃ ।
નાદનામસ્વરાલીનચિત્તશ્રીરામતન્મયઃ ॥ ૨૩૭॥

નામપૂજજપધ્યાનનિજદાસાનુભૂતિગઃ ।
નામતારકરૂપસ્વસર્વદર્શનભાવુકઃ ॥ ૨૩૮॥

નાદપ્રણવગુપ્તાર્થચેઞ્ચુકામ્ભોજિસૂચનઃ ।
નાદદેહોદ્ભવસુદિવ્યોંકારસ્વાનુભૂતિગઃ ॥ ૨૩૯॥

નાદલોલગુરુસ્વામી બ્રહ્માનન્દસુખાલયઃ ।
નાદાલોકનકલ્યાણવસન્તરાગકીર્તનઃ ॥ ૨૪૦॥

નાદલોલહરિસ્વાદુનાદસુસ્વરતોષણઃ ।
નામકીર્તનસંહર્ષાશ્રુપૂરિતાક્ષતૈજસઃ ॥ ૨૪૧॥

નાદતૃષ્ણાપહશ્રીશનામસઙ્કીર્તનાનુતિઃ ।
નાદાકૃતિશિવાનૂતિચિત્તરઞ્જનિસત્કૃતિઃ ॥ ૨૪૨॥

નાદવરાઙ્ગિણીગીતાપવર્ગમાર્ગરોધન-
-નાનાસિદ્ધ્યનુકરણપ્રત્યાદેશસુકીર્તનઃ ॥ ૨૪૩॥

નાદાદ્રિસુપ્રદીપશ્ચ શિખિવાહનગાદ્યુતિઃ ।
નારાયણસ્વસૃસુતામોદારસુકુમારનુઃ ॥ ૨૪૪॥

નામદિવ્યમણિજ્વાલરામાર્થનસુકીર્તનઃ ।
નાનાણ્ડરામલીલાદૃઙ્મહત્સઙ્ગાર્થગાયનઃ ॥ ૨૪૫॥

નાદોપાસનમાહાત્મ્યરાગબેગડસત્કૃતિઃ ।
નાદોપાસનદિવ્યોત્સવસમ્પ્રદાયકીર્તનઃ ॥ ૨૪૬॥

નાદોપાસનભાસશ્રીનારાયણાભિનન્દનઃ ।
નાદસ્વરવિલોલસ્વબેગડાકૃતિવન્દનઃ ॥ ૨૪૭॥

નામતારકગાનેઽનસ્વજન્માર્થગાયનઃ ।
નામતારકસદ્ગાનનિત્યાનન્દસુખસ્વકઃ ॥ ૨૪૮॥

નામગાભક્તિસન્માર્ગમાર્ગહિન્દોલગાયનઃ ।
નાથસાકેતરામપ્રેમભક્ત્યર્થનકીર્તનઃ ॥ ૨૪૯॥

નારદગાનલોલસ્વાદુવાક્કૃતિમનોહરઃ ।
નારદાગમનારાયણપારાયણચારુગઃ ॥ ૨૫૦॥

નારાયણહરિધ્યાનનામસંકીર્તનાલયઃ ।
નારાયણહરિભજનાનન્દબાષ્પહર્ષિતઃ ॥ ૨૫૧॥

નારાયણસુનામાનન્દદિવ્યાકૃતિભાસુરઃ ।
નારાયણીશસામોદજપ્તતારકસન્નુતિઃ ॥ ૨૫૨॥

નારાયણસુસદ્ગાનસઙ્ગીતાલયસેવનઃ ।
નાદાનન્દરસાકારગાનાનન્દરસાકૃતિઃ ॥ ૨૫૩॥

નામધ્યાનહરિશ્રીપરામગાનાભિનન્દિતઃ ।

નામકીર્તનહરિદાસસઙ્ગાનન્દવર્ણનઃ ॥ ૨૫૪॥

નારાયણીકૃતિશ્રીરામસદ્ભજનમાર્ગદર્શનપ્રાર્થન-
-નામાનન્દસદ્ભજનપુણ્યવાન્ ॥ ૨૫૫॥

નારાયણીપ્રિયભ્રાતૃરામમાહિનસન્નુતિઃ ।
નારાયણીરમાપ્રેષ્ઠનામધારાસરાનુતિઃ ॥ ૨૫૬॥

નિગમાગમસઞ્ચારરામસઞ્ચારમાનસઃ ।
નિજદાસરિપુમદઘ્નરામસુમપૂજનઃ ॥ ૨૫૭॥

નિત્યસ્વરૂપસત્યશ્રીરામરત્નગમઙ્ગલઃ ।
નિર્વાણફલદશ્રીરામઘણ્ટારવમઙ્ગલઃ ॥ ૨૫૮॥

નિરામયદસીતાકાન્તજ્ઞાનાર્થનકીર્તનઃ ।
નિરાતઙ્કશુભદશ્રીરામસુપ્રાસપૂર્ણગઃ ॥ ૨૫૯॥

નિર્મલાપઘનશ્રીરામગાનઘનનિર્મલઃ ।
નિર્વિકારગુણાપૂતસર્વસ્વરામકીર્તનઃ ॥ ૨૬૦॥

નિત્યસેવિતસઙ્ગીતશ્રીહૃજ્જયમનોહરિઃ ।
નિષ્ઠાભક્તિસુધાગાનનિધિપ્લાવસુભાગ્યવાન્ ॥ ૨૬૧॥

નિરઞ્જનહરિશ્રીકૃષ્ણદિવ્યપાદભાવનઃ ।
નિર્ગુણબ્રહ્મસગુણધ્યાનાન્તર્જ્ઞાનકીર્તનઃ ॥ ૨૬૨॥

નીરદશ્યામગાત્રનામગોત્રગાનનીરદઃ ।
નીલાભહરિકુસુમાશયતથ્યોપચારગઃ ॥ ૨૬૩॥

નીલામ્બરીસુગાનશ્રીરામદોલોપચારિકઃ ।
નીલામ્બરીસુખાલાપરામસ્વાપનકીર્તનઃ ॥ ૨૬૪॥

નૃત્યગીતાભિવન્દ્યશ્રીરામમિષ્ટોક્તિગાયનઃ ।
નૃપોત્તમસ્વરામોક્તિરાગભાવાઢ્યકીર્તનઃ ॥ ૨૬૫॥

નેત્રોત્સવસસીતશ્રીરામવર્ણનકીર્તનઃ ।
નેમનિત્યોત્સવારાધનોત્તમાનુભવાલયઃ ॥ ૨૬૬॥

નૈજસ્વકૃતપૂજાવિધિવર્ણનસુકીર્તનઃ ।
નૈજાનુરાગપુષ્પામાનસપૂજિતસદ્ગુરુઃ ॥ ૨૬૭॥

નૌયાનગોપિકાકૃષ્ણસંભાષગેયનાટકઃ ।
નૌયાયિગોપિકાડમ્ભહબાલકૃષ્ણજાલગઃ ॥ ૨૬૮॥

પઞ્ચરત્નકૃતિશ્રીરામનામગુણારમઃ ।
પદાર્થરાગભાવાઢ્યલયાલાસગરત્નકઃ ॥ ૨૬૯॥

પદપ્રાસાલસપરિપૂર્ણકામાશ્રયાર્થનઃ ।
પદલાલિત્યસન્નાટકુરઞ્જિતસુકીર્તનઃ ॥ ૨૭૦॥

પરરામકથાસારકર્માબ્ધિતારનાવગઃ ।
પરમાત્મલયસ્ફોટહરિસર્વસ્વકીર્તનઃ ॥ ૨૭૧॥

પરરામસુવાસાતિમઞ્જુકોકિલનાદગઃ ।
પરાદિવાક્સ્વરૂપશ્રીવાણીસેવનકીર્તનઃ ॥ ૨૭૨॥

પરલોકભયાભાવભવમજ્જનખણ્ડનઃ ।
પરલોકભયાપોહરામતારકબોધનઃ ॥ ૨૭૩॥

પરાર્થપ્રાતિકૂલ્યૈહિકેહાગર્હણકીર્તનઃ ।
પરાર્થરામકારુણ્યદયાપરાર્થબોધનઃ ॥ ૨૭૪॥

પટ્ટાભિરામચન્દ્રસ્વાનુભૂતિવ્યક્તકીર્તનઃ ।
પવમાનસુતાગ્રાહ્યપદમઙ્ગલકીર્તનઃ ॥ ૨૭૫॥

પાર્શ્વસેવનસીતાસૌમિત્રિશ્રીરામકીર્તન-
-પાદવન્દનનામધ્યાનમનોભાવહર્ષિતઃ ॥ ૨૭૬॥

પાપજ્વલનશામ્યાપઘનશ્રીરામતારક-
-સ્વર્ણદીસ્નાનસત્ફલસત્યવાગ્વરમાનનઃ ॥ ૨૭૭॥

પિકમિષ્ટસ્વરશ્રીરામસ્વાગતપ્રશાન્તગઃ ।
પિચુમઞ્ચસુમાસ્તારરામોપચારસેવનઃ ॥ ૨૭૮॥

પુષ્પાવર્ષાર્ચિતશ્રીરામસ્વહૃત્કુમુદાર્પણઃ ।
પુષ્પાવર્ષામિતપરાક્રમશ્રીરામચન્દ્રગઃ ॥ ૨૭૯॥

પુષ્પાવર્ષશ્રીરામસ્વાહિરીકીર્તનવર્ણનઃ ।
પુષ્પાવર્ષબહુશ્લોકમુદાઙ્ગીકરસદ્ગુરુઃ ॥ ૨૮૦॥

પુરાણપુરુષશ્રીપનામાવલિઝરાસરઃ ।
પુરસંહરનુતનામસહસ્રગરત્નકઃ ॥ ૨૮૧॥

પુરાણપુરુષપ્રાસપૂરવાક્ચારુકીર્તનઃ ।
પુરાણાગમસારશ્રીરામમાહિનગાયનઃ ॥ ૨૮૨॥

પૂર્ણષડ્જપ્રશાન્ત્યૈકરામપૂર્ણજ્ઞગાયનઃ ।
પૂર્ણેન્દુવક્ત્રલાવણ્યરામાલોકનકીર્તનઃ ॥ ૨૮૩॥

પૂતવાગ્વર્ષસંસિક્તશઙ્કરાભૂષનામકઃ ।
પૂષવંશસુભૂષસ્વનામકીર્તનભૂષણઃ ॥ ૨૮૪॥

પૃથિવીપતિવન્દ્યશ્રીરઘુનન્દનવન્દનઃ ।
પૃથિવીજાપતિશ્રીરામચન્દ્રવન્દ્રગાયનઃ ॥ ૨૮૫॥

પૃથુસુપ્રભસીતાપમઙ્ગલારતિભાસનઃ ।
પૃથુમઞ્જુલસીતાપત્યારતિજ્વલકીર્તનઃ ॥ ૨૮૬॥

પેશલાદિવ્યસઙ્કીર્તનગાલપ્રભુરાઘવઃ ।
પેશલારમ્યગાનાલાપસ્વાનુભૂતનામગઃ ॥ ૨૮૭॥

પેશલસ્વહૃદયારામાહૂતભવતારકઃ ।
પેશલસ્વાનુરાગશ્રીરામાહ્વાનપ્રશાન્તગઃ ॥ ૨૮૮॥

પૈતૃકારાધનસ્વાન્તઃપ્રેમાવર્ષણગાયનઃ ।
પૈતૃકપ્રતિમાપ્રત્યક્ષદૃષ્ટરામચન્દ્રકઃ ॥ ૨૮૯॥

પોતનાલયચિત્તશ્રીરામપાદસુગેયનુઃ ।
પોતનાચાર્યવર્યશ્લોકાવર્ષાર્ચિતસત્પદઃ ॥ ૨૯૦॥

પૌનઃપુનિકગીતશ્રીરામતારકમાહિનઃ ।
પ્રહ્લાદભક્તિવિજયસઙ્ગીતભક્તિમાહિનઃ ॥ ૨૯૧॥

પ્રયાગયમુનાગઙ્ગાવાણીત્રિવેણિસઙ્ગમ-
-સઙ્ગીતજ્ઞાનરાગાનુરાગસઙ્ગમકીર્તનઃ ॥ ૨૯૨॥

પ્રાગુષોદિવ્યનામધ્યાનસઙ્કીર્તનભાવુકઃ ।
પ્રાગુષોનિત્યગાનારાધનવન્દિતરામકઃ ॥ ૨૯૩॥

પ્રાણાનલસુયોગપ્રણવનાદસ્વરાસર-
-વીણાલોલશિવમનોજ્ઞજીવન્મુક્તસદ્ગુરુઃ ॥ ૨૯૪॥

પ્રાણશ્રીરામસદ્ભક્તિસઙ્ગીતજ્ઞાનમોક્ષસાધન-

-સદ્ગાનસુસ્વાદુરાગસારમતીકૃતિઃ ॥ ૨૯૫॥

પ્રાસપૂરકૃતિસ્વાધિપ્રારબ્ધબલગાયનઃ ।
પ્રાસાનુપ્રાસસંભાસટક્કરાગસુકીર્તનઃ ॥ ૨૯૬॥

પ્રાસાનુપ્રાસવાગ્રાગકવિતાચ્છવિલાલિગઃ ।
પ્રાઞ્જલિપ્રાર્થિતશ્રીરામભક્તિભિક્ષ્યસાત્ત્વિકઃ ॥ ૨૯૭॥

પ્રેષ્ઠશ્રીરામભક્તિપ્રૌઢશુભાકરકીર્તનઃ ।
પ્રોક્ષિતશ્રીપચરણોદકદિવ્યશુભાકૃતિઃ ॥ ૨૯૮॥

ફણિશાયિસ્વહૃચ્ચારિઝઙ્કારધ્વનિગાયનઃ ।
ફણિતલ્પવિરાજશ્રીહરિદર્શપ્રહર્ષગઃ ॥ ૨૯૯॥

ફલસત્સુખસત્સઙ્ગાન્તરઙ્ગભયવારણ-
-દાન્તસંરક્ષકાન્તરિકભક્તિમાર્ગબોધનઃ ॥ ૩૦૦॥

ફાલલોચનસાક્ષિત્ત્વરામનામસુખાનુતિઃ ।
ફાલલોચનિધર્મામ્બિકાનૂતિરસસત્કૃતિઃ ॥ ૩૦૧॥

ફુલ્લરાજીવવીક્ષશ્રીરામસોક્તજાનકીસ્તુતિઃ ।
ફેનદ્યુતિસુનામોર્મિદિવ્યકીર્તનસાગરઃ ॥ ૩૦૨॥

બઙ્ગાલગજગત્સાક્ષિવંશજામિતશક્તિનુઃ ।
બહુદારિસુકૃતિશ્રીવાસુદેવમહત્વનુઃ ॥ ૩૦૩॥

બલહંસસ્વહૃદ્ધામસુપુણ્યાનન્દકીર્તનઃ ।
બલહંસકૃતિસ્વેષ્ટરામાર્થિતનિરામયઃ ॥ ૩૦૪॥

બાલરામપરત્વાભાસમાતાપુત્રભાષગઃ ।
બાલલાલિસ્વકવિતાશક્તિદૃષ્ટાન્તકીર્તનઃ ॥ ૩૦૫॥

બાલકૃષ્ણમનોરમ્યલીલાગારસકીર્તનઃ ।
બાલકસ્વાદુવેણુસ્વરગોપિમોહનાનુતિઃ ॥ ૩૦૬॥

બાલાર્કાભસુચેલશ્રીહરિધ્યાનસુખસ્થિતઃ ।
બાલ્યાલાપસુવાક્કીર્તનશ્રીરાઘવસન્નુતિઃ ॥ ૩૦૭॥

બિલહૃત્શ્રીહરિધ્યાનહંસસ્સોહઁલ્લયાલયઃ ।
બિલહૃદાત્મલીપ્રાણોજ્જીવનાપુણ્યકીર્તનઃ ॥ ૩૦૮॥

બીજપ્રણવનાદાકૃતિરામભજનાલયઃ ।
બીજોંકારસુનાદોપાસનશ્રીરામતન્મયઃ ॥ ૩૦૯॥

બુદ્ધિપ્રાપ્ત્યર્થસદ્રામદાસમૈત્ર્યગુરુત્વગઃ ।
બુદ્ધ્યર્થપ્રાપ્ત્યવશ્યાનન્યભક્તવાક્તપાનગઃ ॥ ૩૧૦॥

બૃહત્પ્રમાણભુવનાધારૈકરામગાનુતિઃ ।
બૃહદ્ભુવનમૂલામૂલનારાયણગૌલગઃ ॥ ૩૧૧॥

બૃન્દાવનાભિલોલશ્રીકૃષ્ણગોવિન્દગારમઃ ।
બૃન્દારાધારરઘુવીરસ્વહૃચ્ચારિગાયનઃ ॥ ૩૧૨॥

બોધારાધિતસીતારાઘવસન્નુતિકીર્તનઃ ।
બોધાતીતપરબ્રહ્મશ્રીરામભક્તિબોધનઃ ॥ ૩૧૩॥

બોધવર્ધનસત્કીર્તનભક્તલક્ષગાયનઃ ।
બૌદ્ધશ્રીરામભક્તિપ્રવાહસંમગ્નસદ્ગુરુઃ ॥ ૩૧૪॥

બ્રહ્માશઙ્કરવિષ્ણૂત્કૃષ્ટપરબ્રહ્મરામગઃ ।
બ્રહ્મૈક્યતત્ત્વસદ્દર્શગરુડધ્વનિગીતિકઃ ॥ ૩૧૫॥

બ્રાહ્મમુહૂર્તગાસુપ્રભાતસીતાસરામકઃ ।
બ્રાહ્મમુહૂર્તનાદોપાસનપૂજિતરામકઃ ॥ ૩૧૬॥

ભક્તપાપવિમોક્તૃશ્રીરામરાગસ્વરાયુતઃ ।
ભક્તમોચકરામેડાસત્કીર્તનગમોચકઃ ॥ ૩૧૭॥

ભક્તસેવનરામસ્વનિશ્ચલભક્તિસેવનઃ ।
ભક્ત્યાપ્રિયત્નસત્સારોપદેશસામકીર્તનઃ ॥ ૩૧૮॥

ભવજીવનજભવાર્ચિતશ્રીરામભાવગઃ ।
ભવનાટકપાપઘ્નસૌખ્યહર્ષૈક્યચિત્તગઃ ॥ ૩૧૯॥

ભવપાશનિબદ્ધસ્વમન્દારિકૃતિખણ્ડનઃ ।
ભવપાશવિમોક્તૃશ્રીપરામપાશબન્ધિતઃ ॥ ૩૨૦॥

ભવક્લેશવિનાશશ્રીહરિનામગચોદનઃ ।
ભવરોગહરશ્રીહરિસંકીર્તનવાગ્ઘરઃ ॥ ૩૨૧॥

ભવસન્નુતસન્નામજપરોધભવાપહઃ ।
ભવનીરધિતારશ્રીરામતારકજાપકઃ ॥ ૩૨૨॥

ભવાનીરતસન્નામતારકાસ્પદગાયનઃ ।
ભવાનુતસ્વહૃદયારમસંમૃદુગાયનઃ ॥ ૩૨૩ ॥

ભવપ્રિયસુનામશ્રીકાન્તગાનુતિભાષણઃ ।
ભવપ્રિયપ્રિયારામરામશૌર્યસુવર્ણનઃ ॥ ૩૨૪ ॥

ભવાબ્ધિતરણોપાયરામાધૃતકરામ્બુજઃ ।
ભવવારણવરવારણરક્ષણગારમઃ ॥ ૩૨૫ ॥

ભવસારસભવમાનસસ્વભવનાનુતિઃ ।
ભવદશ્રીપસન્નુત્યદ્ભુતપ્રાસસુવાક્કૃતિઃ ॥ ૩૨૬ ॥

ભાવસસ્તુતભાવાભાવસ્વશ્રીરામચન્દ્રકઃ ।
ભાવસ્થસ્વમનશ્શ્રીરામનામસતતવ્રતઃ ॥ ૩૨૭ ॥

ભાવભાવિતભાવશ્રીસીતારામસ્થભાવનઃ ।
ભાવકીર્તનસન્નૂતશ્રીપપાવનરાઘવઃ ॥ ૩૨૮ ॥

ભાવજારિનુતશ્રીરામપાદસેવરક્ષગઃ ।
ભાનુવંશતિલકરામભક્તતિલકાદૃતઃ ॥ ૩૨૯ ॥

ભિન્નષડ્જકૃતિસ્ફોટભિન્નમાનસવેદનઃ ।
ભિષજ્યરામસાન્નિધ્યસ્વાધિગાનનિવેદનઃ ॥ ૩૩૦ ॥

ભીતિચ્છેદનકોદણ્ડપાણ્યાહ્વાનસુસત્કૃતિઃ ।
ભીતિચ્છિદ્રામસૌમિત્રિપ્રસન્નજીવકીર્તનઃ ॥ ૩૩૧ ॥

ભુક્તિમુક્તિદસદ્ભક્તિકૃતિદાશરથીર્ણગઃ ।
ભુક્તિમુક્તિદરામેડાસીતાકલ્યાણસત્કૃતિઃ ॥ ૩૩૨ ॥

ભુવનાધારરામપ્રાસજ્વલદ્ભજનાલયઃ ।
ભુવનાધારરામસ્વજીવાધારદિનાચરઃ ॥ ૩૩૩ ॥

ભુવનત્રયદુર્લભ્યહરિદર્શનભાગ્યવાન્ ।
ભુવનત્રયપાલશ્રીકૃષ્ણગાનસ્વરૂપગઃ ॥ ૩૩૪ ॥

ભુવનાવાસભુવનવાસિરામપરાનુતિઃ ।
ભુવનેશજનકજાસમેતરામગેયનુઃ ॥ ૩૩૫ ॥

ભુવિલાવણ્યનિધિકીર્તનવિસ્મિતશિક્ષકઃ ।

ભુવિસ્થહરિનારાયણરામસેવગાસરઃ ॥ ૩૩૬॥

ભુજગાભૂષણાજપ્તનામતારકભૂષણઃ ।
ભુજઙ્ગશાયિસીતાપમઙ્ગલારતિરાજકઃ ॥ ૩૩૭॥

ભૂજાપનામપ્રત્યૂષભૂપાલરાગકૂજનઃ ।
ભૂપાલવન્ધરામસ્વસ્વાદુગાનાભિવન્દનઃ ॥ ૩૩૮॥

ભૂજાપદૃશ્યમાનાયોધ્યાનગરીસ્વમાનસઃ ।
ભૂજારામાન્તરારામજ્ઞાનપક્વસુમાનસઃ ॥ ૩૩૯॥

ભૃગુસૂનુમદાપોહરઘુવીરહૃદાલયઃ ।
ભૃત્યપાલકરામપ્રાસપૂર્ણામૃતવાક્સુગઃ ॥ ૩૪૦॥

ભેષજાપુણ્યસન્નામકીર્તનાનુતરામકઃ ।
ભૈષજ્યનામસઙ્કીર્તનાનન્દપુલકાઙ્કિતઃ ॥ ૩૪૧॥

ભૈરવારામસન્નામશ્રીરામરક્ષણાર્થગઃ ।
ભૈરવાપૂજિતશ્રીહરિરામકૃતિભાષણઃ ॥ ૩૪૨॥

ભૈરવીરાગસત્કીર્તનાનન્દસારવર્ણકઃ ।
ભૈરવીકીર્તનામોદરામશ ૃઙ્ગારગાયકઃ ॥ ૩૪૩॥

ભૈરવીકૃતિસીતાસકોદણ્ડપાણિવર્ણનઃ ।
ભૈરવીગીતહૃદ્ભાસસર્વાન્તર્યામિરામકઃ ॥ ૩૪૪॥

ભોગાનુભવબુદ્ધિશ્રીસીતારામલયસ્થિતઃ ।
ભોગતૃષ્ણાપહશ્રીરામકેદારગસઁલ્લયઃ ॥ ૩૪૫॥

ભોગીન્દ્રશુભ્રશાયિશ્રીજાનકીપ્રાણનાથગઃ ।
ભોગ્યનામરુચિપ્રેમસ્વાનુભૂતિગસદ્ગુરુઃ ॥ ૩૪૬॥

ભૌલીપ્રત્યૂષગાનશ્રીરામજાગરઘાણ્ટિકઃ ।
ભૌલીરાગનુતાગીતદશાવતારરામકઃ ॥ ૩૪૭॥

મદમત્સરપટપાટનાર્થહરિગાયનઃ ।
મદમાત્સર્યવિચ્છેતૃગૌલીપન્તુસુકીર્તનઃ ॥ ૩૪૮॥

મનોવિષયવશદુર્લભ્યરામકૃપાપ્તિગઃ ।
મનઃપક્વસહજભક્તિસ્વરજ્ઞાનમુક્તિગઃ ॥ ૩૪૯॥

મનસ્સ્વાધીનતત્ત્વાર્થજ્ઞાનાવબોધગાનખઃ ।
મનોનૈર્મલ્યનૈશ્ચલ્યરામસ્વગુરુગાયનઃ ॥ ૩૫૦॥

મનોબિલહરિશ્રીનરસિંહભક્તિસેવનઃ ।
મનોબિલહરિસ્મરજપપાદાર્ચનાર્થનઃ ॥ ૩૫૧॥

મન્ત્રરાજજપવિરાજમહરાજભક્તિમાન્ ।
મહરાજસ્વરામાર્ચનરાજસુમતારકઃ ॥ ૩૫૨॥

મન્દરાગધરશ્રીમાધવમઙ્ગલકીર્તનઃ ।
મઞ્જુલરૂપધરકૃષ્ણસુમઙ્ગલગાયનઃ ॥ ૩૫૩॥

મનોરઞ્જનિરાગસ્વમનોભાવનિવેદનઃ ।
મનોરઞ્જનબહુરઙ્ગનાનાભાવકીર્તનઃ ॥ ૩૫૪॥

મહાર્થનાદવિદ્યામર્મજ્ઞવેદાર્થતત્ત્વવિત્ ।
મહદ્બુદ્ધ્યપલાપપૃષ્ટરામવિનયાન્વિતઃ ॥ ૩૫૫॥

માધુર્યપૂર્ણવાગ્રામમાધુર્યપૂર્ણવાગ્રમઃ ।
માનવાવતરશ્રીરામપરત્વજ્ઞસદૃષિઃ ॥ ૩૫૬॥

માનરક્ષકરામસ્વાનન્યહિન્દોલકીર્તનઃ ।
માશ્રીરમણરામગેયસાયરક્ષબન્ધનઃ ॥ ૩૫૭॥

માનસાપૂજિતશ્રીરઘુનાથપદચિન્તનઃ ।
માનસસ્નાનસત્કીર્તનધ્યાનવરિવસ્ચિતઃ ॥ ૩૫૮॥

મારરઞ્જનિગાશ્રીરામદયારોધસૂચનઃ ।
મારામમન્ત્રમહિમાજ્ઞતમોઽન્વિતખણ્ડનઃ ॥ ૩૫૯॥

માલવગૌલધીરશ્રીરઘુવીરસુવર્ણનઃ ।
માયામ્બુદસમીરશ્રીરામસ્વાધિનિવેદનઃ ॥ ૩૬૦॥

માપ્તસાકેતરામસ્વાતઙ્કુતીવ્રવાચકઃ ।
માલવશ્રીકૃતિસ્વાયાસાલાપહૃદયઙ્ગમઃ ॥ ૩૬૧॥

માતાપિતૃગુરુસ્વાશ્રયદૈવસર્વરામગઃ ।
માસિંહવાહિનીરામનામસદ્ભક્તતલ્લજઃ ॥ ૩૬૨॥

મિત્રવંશેશચારિત્રામૃતપાયનગાયનઃ ।
મિત્રકુલેશમિત્રીભાવસંભાષણકીર્તનઃ ॥ ૩૬૩॥

મિત્રિસેવનનાનારાગશ્રીરામનુહર્ષગઃ ।
મિત્રિશ્રીરામતત્ત્વાર્થનુતિગાસેવભાગ્યગઃ ॥ ૩૬૪॥

મીનાદિદશવેષશ્રીરામવેષસમીડનઃ ।
મુકુન્દનામગારામસ્વવેદનાનિવેદનઃ ॥ ૩૬૫॥

મુકુન્દનામધારાપ્રાસમનોહરકીર્તનઃ ।
મુનિયાગસુપાલશ્રીરઘુરામકૃતિસ્તુતિઃ ॥ ૩૬૬॥

મુત્યવાક્કૃતિયમચિન્તનકારણતારક-
-નામસઙ્કીર્તનભજનસન્માર્ગગસૂચનઃ ॥ ૩૬૭॥

મુદસન્નુતનાદબ્રહ્માનન્દરૂપવેદસારનામધેયભદ્રશ્રીરામચિન્તનહર્ષિતઃ ॥ ૩૬૮॥

મૂલાધારજનાદપ્રણવાકૃતિમનોલયઃ ।
મૂલસ્થાનોત્થનાદાનન્દમોક્ષપ્રાપ્તિગાયનઃ ॥ ૩૬૯॥

મૃદઙ્ગતાલયુક્તસ્વરશુદ્ધિયતિવિશ્રમ-
-સદ્ભક્તિનિજવાગ્દ્રાક્ષારસસત્કૃતિચગ્ચુરઃ ॥ ૩૭૦॥

મેઘશ્યામાવનિસુતાધવનિત્યાનુભૂતિગઃ ।
મેધાવિલાસસંભાસપદલાસાઙ્કુકીર્તનઃ ॥ ૩૭૧॥

મૈત્રાવરુણરામાયણરસાનુભવાસ્પદઃ ।
મૈથિલીશકવિપ્રાણબહુકીર્તનસન્નુતિઃ ॥ ૩૭૨॥

મોહનદ્યુતિશોભશ્રીરામમોહનમોહિતઃ ।
મોહનશ્રુતિશુદ્ધસ્વગાનમોહિતરામકઃ ॥ ૩૭૩॥

મોહનાલાસ્યરાગશ્રીરામમોહનકીર્તનઃ ।
મોહનારામરામસ્વમોહોત્પન્નસુકીર્તનઃ ॥ ૩૭૪॥

મોક્ષદશ્રીપસદ્ભક્તિસઙ્ગીતજ્ઞાનમાર્ગણીઃ ।
મોક્ષપ્રણવનાદજ્ઞાનજીવન્મુક્તસદ્ગુરુઃ ॥ ૩૭૫॥

મોદસશ્રીરઘુવરાબોધસદ્ભક્તિમર્મગઃ ।
મોદરૂપસ્વરામપ્રેમપૂરૈકાન્તલાલિગઃ ॥ ૩૭૬॥

મૌન્યુપાસિતનાદબ્રહ્માનન્દલયસન્મુનિઃ ।
મૌનાત્મલયનાદપ્રણવાકૃતિસુખધ્વનિઃ ॥ ૩૭૭॥

યજ્ઞાદિબાહ્યકર્મસ્થસુજ્ઞાનહીનખણ્ડનઃ ।
યદુનન્દનનૌકાલીલાગોપીગર્વહારગઃ ॥ ૩૭૮॥

યાદવાભ્યુપદિષ્ટશ્રીગીતાસારસુકીર્તનઃ ।
યાગપાલનરામસ્વરક્ષાર્થાર્થનકીર્તનઃ ॥ ૩૭૯॥

યાગરક્ષણસંદર્શસ્ફુટાશ્ચર્યકૃતિસ્તુતિઃ ।
યાગયોગફલાવર્ષરાગસુધારસાસરઃ ॥ ૩૮૦॥

યાન્તભાન્તનિશાન્તશ્રીરામનામનિશાન્તગઃ ।
યોગિવૃન્દાર્ચિતપદાર્ચનપ્રાસનટાશુગઃ ॥ ૩૮૧॥

યોગાતિશ્રેષ્ઠનાદોપાસનયોગસ્થસદ્ગુરુઃ ।
યોગીન્દ્રવરહૃદ્ભાવિતસ્વહૃદ્ભાવનાશુગઃ ॥ ૩૮૨॥

યૌગિકસ્વાદુસઙ્ગીતનામસઙ્કીર્તનૌષધિઃ ।
યૌવનારામરામસ્વયૌવનારમ્યકીર્તનઃ ॥ ૩૮૩॥

રમણીયસુનામશ્રીરામાભિરામગારમઃ ।
રઞ્જનીરાગસત્કીર્તનાન્તર્ગલનમાર્દવઃ ॥ ૩૮૪॥

રસાલીકીર્તનશતાનાયાસરચનાદ્ભુતઃ ।
રસિકાવનરામસ્વાતુલ્યવાગ્રીતિગાયનઃ ॥ ૩૮૫॥

રઘુરામસતીનૂતિકવિતાચ્છવિકીર્તનઃ ।
રઘુરામગુણારામગાપુણ્યતીર્થસૂચનઃ ॥ ૩૮૬॥

રઘુરાજદિવસરાજરાજનયનાનુતિઃ ।
રઘુનાયકપાદાબ્જદૃઢગ્રહણભક્તિમાન્ ॥ ૩૮૭॥

રઘુનન્દનસદ્ભક્તોત્તમોત્તમસુગાયનઃ ।
રાજમોહનરમમાનસસપ્રેમચિન્તનઃ ॥ ૩૮૮॥

રઘુનન્દનગત્યૈકસદ્ધ્યાનશરણાગતઃ ।
રાજેશ્વરમહારાજરામાવતારસાધુગઃ ॥ ૩૮૯॥

રાકાશશિવદનપાદસેવદૈનભાવનઃ ।
રામભક્તિસુસામ્રાજ્યબ્રહ્માનન્દાનુભૂતિગઃ ॥ ૩૯૦॥

રાગરત્નસુમાલારઞ્જિતશ્રીહરિસેવનઃ ।

રામસેવનસૌભાગ્યતારકાનન્દકીર્તનઃ ॥ ૩૯૧॥

રાગસારમતિદ્યોતકૃતિનાદસુમૂલગઃ ।
રાગચ્છવિલસત્કીર્તનતન્ત્રીસ્વરરાગગઃ ॥ ૩૯૨॥

રામશ્રીરામલાલ્યૈકાન્તપૂજાસૂચકીર્તનઃ ।
રામદૈવસ્વનિન્દાસ્તુતિહાસ્યપૂરકીર્તનઃ ॥ ૩૯૩॥

રામાવતારમર્માર્થકથાનલિનકાન્તિગઃ ।
રાગતાલચ્છવિસહજપ્રાસમઞ્જુકીર્તનઃ ॥ ૩૯૪॥

રામચન્દ્રસુકરુણાન્તરઙ્ગજ્ઞાનગાયનઃ ।
રામાવતારભવવન્યકર્મ્યાદર્શરીતિગઃ ॥ ૩૯૫॥

રાગાનુરાગસઙ્ગીતરામાસ્યપૂર્ણચન્દ્રિકઃ ।
રામસ્વમાનસારાધ્યનામકીર્તનતન્મયઃ ॥ ૩૯૬॥

રામચિન્તનસુજ્ઞાનનામતારકતત્ત્વગઃ ।
રામનામસુખાલીનસમાધિસ્થમહામુનિઃ ॥ ૩૯૭॥

રામૈકાન્તાર્ચનારાધનચિન્તનૈક્યભાવનઃ ।
રામસદ્ભક્તિવૈરાગ્યસુજ્ઞાનાદ્વૈતભાવગઃ ॥ ૩૯૮॥

રામરામસદાનાદજ્ઞાનપુષ્કલસત્કૃતિઃ ।
રામગાનસુધાનાદભાવપુષ્કલસઙ્ગતિઃ ॥ ૩૯૯॥

રામસાન્નિધ્યદૌર્લભ્યાપભૂજાલક્ષ્મણાદિમહાત્મકીર્તન-
-કોકિલવરાલીરાગચારુગઃ ॥ ૪૦૦॥

રાગામૃતરસાપાનસ્વરોંકારજ્ઞનાદવિત્ ।
રાગસ્વરયુતપ્રેમભક્તરક્ષકરામગઃ ॥ ૪૦૧॥

રામૈકસત્યતથ્યોપચારસારઙ્ગકીર્તનઃ ।
રામૈકનિત્યનિત્યોત્સવાગીતનિજદાસગઃ ॥ ૪૦૨॥

રામનિત્યૈકસત્યસ્વનિજદાસત્વતથ્યગઃ ।
રાગનિત્યોત્સવાગીતદેવાદિદેવરામકઃ ॥ ૪૦૩॥

રાગરત્નાઙ્ગિલક્ષ્મીશ્રીરૂપાષ્ટકસુકીર્તનઃ ।
રાગકીર્તનરત્નશ્રીલક્ષ્મીસ્વમોક્ષરૂપગઃ ॥ ૪૦૪॥

રાગપઞ્જરકીરશ્રીરામાનુરાગપઞ્જરઃ ।
રાગતાલલયારામરામસમ્ભાષણોત્સુકઃ ॥ ૪૦૫॥

રાગાર્થિતસ્વસંભાષણસાર્વભૌમરામગઃ ।
રાગસઙ્ગીતનવનીતાશશ્રીકૃષ્ણસન્નુતિઃ ॥ ૪૦૬॥

રાગવાગ્રસધારાસારશ્રીકૃષ્ણનુકીર્તનઃ ।
રાગપઞ્જરરાગપ્રાસસ્ફુરત્કૃતિરત્નકઃ ॥ ૪૦૭॥

રાગપઞ્જરગાકીરઃ કીરવાણીસુખશ્રુતિઃ ।
રાગમાનસસંતાપકીરવાણીસુગાકૃતિઃ ॥ ૪૦૮॥

રામસર્વસ્વસુજ્ઞાનપૂર્વીકલ્યાણિસત્કૃતિઃ ।
રામાનવધિસુખનિષ્કલઙ્કપરિપૂર્ણગઃ ॥ ૪૦૯॥

રામરાગોપચારસ્વશતિરાગકૃતિસ્તુતિઃ ।
રાગરત્નશતાલઙ્કારરાજિતસ્વરામકઃ ॥ ૪૧૦॥

રામસ્વજપમન્ત્રાક્ષરજીવાધારસર્વગઃ ।
રામસર્વસ્વભાવાજીવનિર્વિકલ્પસુસ્થિતિઃ ॥ ૪૧૧॥

રિપુભીષણનામાસારગઙ્ગીભૂતકીર્તનઃ ।
રીતિગૌલસુરાગદ્વૈતાદ્વૈતતત્ત્વસૂચનઃ ॥ ૪૧૨॥

રુદ્રાધીશરમેશશ્રીરામસઞ્ચરમાનસઃ ।
રૂપાતિદિવ્યલાવણ્યૈકરામૈકનુકીર્તનઃ ॥ ૪૧૩॥

રોહિણીતોયજારીદૃશસીતારામગેડનઃ ।
રોમાઞ્ચનકરશ્રીસીતારામાશુગકીર્તનઃ ॥ ૪૧૪॥

રોમાઞ્ચનકવચરામભક્તમુદ્રસેવકઃ ।
રોચિષ્ણુરામનામસ્વખડ્ગષચ્છત્રુસંદમઃ ॥ ૪૧૫॥

લતાઙ્ગિકૃતિસૌમિત્રિપાદસેવનવર્ણનઃ ।
લક્ષ્મણાહર્ષકરદૃષ્ટ્યપાઙ્ગાર્થનકીર્તનઃ ॥ ૪૧૬॥

લસન્મકુટહરિવેઙ્કટેશારભિગાનુતિઃ ।
લક્ષ્મીનૃસિંહપદભક્તિસત્સઙ્ગાર્થનાકૃતિઃ ॥ ૪૧૭॥

લાલિગાનરઘુશ્રેષ્ઠસુમરાજસુશાયનઃ ।
લાલિનીલામ્બરીરાગમૃદુમાધુર્યસાન્ત્વનઃ ॥ ૪૧૮॥

લિખિતશ્લોકસંપૂર્ણવાસસદ્ગુરુદૈવતઃ ।
લિપિસઙ્ગીતસામોદપુષ્પાલઙ્કૃતસદ્ગુરુઃ ॥ ૪૧૯॥

લીલાવતારજગદીશપ્રાસરસવાઙ્નુતિઃ ।
લીલાનાટકરામામૃતકથારસસારગઃ ॥ ૪૨૦॥

લુપ્તવિગ્રહસંતાપકૃત્યુન્નતમનસ્સ્થિતિઃ ।
લુબ્ધાર્થરામમૂર્ત્યન્વેષણકૃત્યાર્દ્રભક્તહૃદ્ ॥ ૪૨૧॥

લૂનમાનસપુષ્પારાધનપ્રીણિતસદ્ગુરુઃ ।
લેખારૂપકસંદૃશ્યમાનસદ્ગુરુદૈવકઃ ॥ ૪૨૨॥

લોકાવનચતુરરામાગ્રાવનતભાવુકઃ ।
લૌક્યાતીતસ્વભાવાદર્શાનેકસ્ફટિકકૃતિઃ ॥ ૪૨૩॥

વકુલાભરણસુગીતનિર્દોષસ્વપોષકઃ ।
વરરામજપાનન્દધિપ્લાવપુણ્યરાશિગઃ ॥ ૪૨૪॥

વનજાક્ષસ્વનિન્દાસ્તુતિકીર્તનસુગારસઃ ।
વનજાક્ષાનનાજીવદર્શનાનન્દસાર્ચનઃ ॥ ૪૨૫॥

વનસ્પતિહરિસ્વાન્તરાતઙ્ગોક્તસુકીર્તનઃ ।
વરદપૃષ્ટપરિહાસાર્થસ્વશરણાગતિઃ ॥ ૪૨૬॥

વનેહભવતરણોપાયરામૈકતત્ત્વગઃ ।
વરશ્રીરમણોપાસનશરણાર્થિસત્ત્વગઃ ॥ ૪૨૭॥

વનમાલિદયાર્થસ્વાદ્વિતીયરીતિગાયનઃ ।
વનસત્કૃતિરાગાન્દાલીપ્રાસપુષ્કલાશુગઃ ॥ ૪૨૮॥

વરનામરુચિસ્વાનુભૂતિપ્રેમાર્દ્રગાયનઃ ।
વરરામખરહરપ્રિયસાલાપકીર્તનઃ ॥ ૪૨૯॥

વરમન્ત્રગ્રહણલોલનામતારકાલયઃ ।
વરુણાલયગાંભીર્યગૌરીડાકવિતાલસઃ ॥ ૪૩૦॥

વરરામસ્વવીણામિષ્ટસ્વરોત્સવકીર્તનઃ ।
વરનારાયણશ્રીહરિદિવ્યનામગાલયઃ ॥ ૪૩૧॥

વરનારાયણશ્રીકૃષ્ણલીલારસસત્કૃતિઃ ।

વરકીર્તનગઙ્ગાશઙ્કરાભરણસઙ્ગતિઃ ॥ ૪૩૨॥

વરનારદવીણાસદર્શનાહ્લાદગાયનઃ ।
વરનારદમૌન્યાજપ્તનારાયણનામગઃ ॥ ૪૩૩॥

વરમૂર્છનભેદસ્વરજાતિજ્ઞગુરૂત્તમઃ ।
વરરાગલયોંકારાકારનાદરહસ્યવિત્ ॥ ૪૩૪॥

વરેતજ્જ્ઞાનહીનાત્મશંસનગર્વખણ્ડનઃ ।
વરરાગલયજ્ઞાસ્વવરગાનવરારકઃ ॥ ૪૩૫॥

વરદોત્સવદર્શાર્થસ્વરભૂષણિગાયનઃ ।
વરનાગવરદવરગાનનાગસન્મુનિઃ ॥ ૪૩૬॥

વરમારુવધન્યાસીકીર્તિતામૃદુભાષણઃ ।
વરમાવરપદપઙ્કજગત્યૈકગાયનઃ ॥ ૪૩૭॥

વરાસમાનરામશ્રીભક્તિપઞ્જરકીરગઃ ।
વરભાષમધુસ્વાદુહરિસ્વકુલભૂષગઃ ॥ ૪૩૮॥

વસન્તભૈરવીમિષ્ટાભિરોરુદસુકીર્તનઃ ।
વસન્તકૈરવીલાસરાગલક્ષણકીર્તનઃ ॥ ૪૩૯॥

વસન્તારાગસીતારામમાતાપિતૃભાવગઃ ।
વસન્તચ્છવિલાસ્યશ્રીરામપ્રાપ્તિસ્વભાગ્યગઃ ॥ ૪૪૦॥

વાક્યેલાવૃતનાદબ્રહ્માનન્દરસરામકઃ ।
વાગ્રાગસુસ્વરાભૂષમૃદુભાષસ્વરામગઃ ॥ ૪૪૧॥

વાણીચામરરામોપચારક્રમસુગાયનઃ ।
વાણીગમ્ભીરનાટસીતાપભજનયોગગઃ ॥ ૪૪૨॥

વાચસ્પતિસ્વરારામવરારામસુકીર્તનઃ ।
વાચસ્પતિવરાનન્દવાગ્વર્ષગાનતલ્લજઃ ॥ ૪૪૩॥

વાચામગોચરશ્રીરામવાગમૃતવર્ણનઃ ।
વાગ્વર્ષગાનલોલશ્રીરામમાહિનગાનુતિઃ ॥ ૪૪૪॥

વિજયશ્રીદહરિજપાનન્દનારદાનુતિઃ ।
વિષ્ણુસ્વરૂપવરસદ્ગુરુનારદકીર્તિનુઃ ॥ ૪૪૫॥

વિનતાસુતઘનનાગપાશખણ્ડનાર્થિત-
-વિષ્ણુવાહનભક્તપ્રહ્લાદાહ્વાનચરિત્રગઃ ॥ ૪૪૬॥

વિનતાસુતવાહશ્રીવરદોત્સવવર્ણનઃ ।
વિધિદેવનુવૈશાખોત્સવકાઞ્ચીપકાન્તિગઃ ॥ ૪૪૭॥

વિનતાસુતવાહશ્રીરમણાદર્શસેવનઃ ।
વિરક્તાસક્તસુજ્ઞાનિસત્સઙ્ગતિસૌખ્યગઃ ॥ ૪૪૮॥

વિનયાનુતસીતાપદર્શોત્કરસગાયનઃ ।
વિનાયકનુતશ્રીરઘુવીરનુતિગાનતઃ ॥ ૪૪૯॥

વીણાનાદસસઙ્ગીતપુજોત્સવદિનાચરઃ ।
વીતદુર્મતિસત્સઙ્ગનામપૂજાગુરુત્વગઃ ॥ ૪૫૦॥

વૃન્દારગણવન્દ્યશ્રીરામમઙ્ગલકીર્તનઃ ।
વેઙ્કટેશસુનામામૃતસોપાનપરામુદઃ ॥ ૪૫૧॥

વૈદેહીપદભક્ત્યર્થનસહાનસુકીર્તનઃ ।
વૈભોગરઙ્ગરઙ્ગક્ષેત્રોત્સવસ્વાદુવર્ણનઃ ॥ ૪૫૨॥

વૈકુણ્ઠનાથભૂલોકમુત્યાઙ્ગિસેવવર્ણનઃ ।
વૈનતેયગમનશ્રીવાસુદેવકૃપાર્થગઃ ॥ ૪૫૩॥

શઙ્કરાભરણાપૂતગઙ્ગાસારસુકીર્તનઃ ।
શઙ્કરપ્રિયસન્નામમાહાત્મ્યસ્વાદુગાયનઃ ॥ ૪૫૪॥

શઙ્કરાભરણાગમ્ભીરવાક્શૈલીસુકીર્તનઃ ।
શમ્ભુત્રિજગદીશસ્વગાનાહ્વાનસુગાપતિઃ ॥ ૪૫૫॥

શઙ્કરાભરણાગીતસ્વરરાગસુધારસઃ ।
શઙ્કરપ્રાસપૂર્ણસ્વવિશિષ્ટશબ્દરીતિગઃ ॥ ૪૫૬॥

શર્મશ્રીરામગુણગાનજ્ઞાનધનસદ્ગુરુઃ ।
શમનસ્વરસપ્તસ્વરૂપાદિમૂલગાયનઃ ॥ ૪૫૭॥

શાન્તસૌખ્યમનઃપક્વસામરાગસુકીર્તનઃ ।
શાન્તસન્ધ્યાસુવેલાભામઞ્જુગુઞ્જસુગાયનઃ ॥ ૪૫૮॥

શિખિવાહનસન્નૂતિસુપ્રદીપસુગામણિઃ ।
શિઞ્જજ્ઝલ્લકમઞ્જીરસ્વાદુગાનટનાકૃતિઃ ॥ ૪૫૯॥

શીકારગઙ્ગિકાભૂતસુદિવ્યનામકીર્તનઃ ।
શીકારદૃષ્ટિદીક્ષાજ્ઞાનોપદેશનસદ્ગુરુઃ ॥ ૪૬૦ ॥

શુદ્ધાન્તરઙ્ગનાદોપાસનબોધનસદ્ગુરુઃ ।
શુદ્ધબઙ્ગાલકૃતિરામભક્તિસ્વાનુભૂતિગઃ ॥ ૪૬૧ ॥

શુદ્ધસ્વમાનસારામરામપ્રેમાઢ્યસત્કૃતિઃ ।
શુદ્ધસીમન્તિનીજાનકીરામરામગાયનઃ ॥ ૪૬૨ ॥

શુભાઙ્ગયદુવીરસ્વાર્પણગોપીસુતોષગઃ ।
શુભચારિત્રરામોત્સવશોભાનસુકીર્તનઃ ॥ ૪૬૩ ॥

શુભશ્રીરામસદ્ભક્તરક્ષવિશ્વાસપૂરગઃ ।
શૂરશ્રીરામશરનૈપુણ્યાશંસનકીર્તનઃ ॥ ૪૬૪ ॥

શૃઙ્ગારરામસીતાસેવનવર્ણનકીર્તનઃ ।
શેષતલ્પરમાસેવાન્તશ્ચક્ષુર્દશકીર્તનઃ ॥ ૪૬૫ ॥

શૃઙ્ગારજાનકીમલ્લિકામોદવર્ષસેવન-
-શેષશાયિસ્વસઙ્ગીતગાનાખ્યાનવરાર્થનઃ ॥ ૪૬૬ ॥

શૈલીલાઘવગૂઢાનવગમાર્થાઙ્કુકીર્તનઃ ।
શૈલવચ્ચિત્તનૈશ્ચલ્યરામસ્વગુરુગાયનઃ ॥ ૪૬૭ ॥

શોભનાચારુસપ્તસ્વરોપાસનોપદેશનઃ ।
શોભાવદ્રામનાદોપાસનવન્દનચોદનઃ ॥ ૪૬૮ ॥

શોકવારણસઙ્ગીતાત્મારામલયસાધનઃ ।
શૌભશ્રીરામહૃદયાયોધ્યાદર્શનસૂચનઃ ॥ ૪૬૯ ॥

શ્યામસુન્દરરામૈકસર્વશક્તિસુગાયનઃ ।
શ્યામશ્રીરામમરકતાભપ્રેમરસોત્સુકઃ ॥ ૪૭૦ ॥

શ્રિતચિન્તામણિશ્રીરામગાનાનન્દસાલયઃ ।
શ્રિતાવનવ્રતશ્રીરામનામકીર્તનવ્રતઃ ॥ ૪૭૧ ॥

શ્રીરામાયણસંક્ષિપ્તરીતિગૌલસુકીર્તનઃ ।
શ્રીમદ્રામાયણરસાનુભૂતિબહુકીર્તનઃ ॥ ૪૭૨ ॥

શ્રીરામસોક્તમાજાનકીમહચ્છ્રૈષ્ઠ્યકીર્તનઃ ।

શ્રીનાયકયશોમૂલજાનકીનુતિગાયનઃ ॥ ૪૭૩॥

શ્રીરામનામસર્વોન્નતસુખસ્વાનુભૂતિગઃ ।
શ્રીરામનામસુજ્ઞાનતારકેહપરાર્થગઃ ॥ ૪૭૪॥

શ્રીરામપાર્શ્વસીતાલક્ષ્મણસાષ્ટાઙ્ગવન્દન-
-નામધ્યાનસુગાનપ્રશ્નસ્વાનુભૂતિહર્ષગઃ ॥ ૪૭૫॥

શ્રીરામાપાઙ્ગદૃષ્ટિન્યાયપ્રશ્નરસકીર્તનઃ ।
શ્રીરામાદૃશ્યદિવ્યાતિસૌન્દર્યગાનવર્ણનઃ ॥ ૪૭૬॥

શ્રીરામરઘુરામસ્વાન્તરાર્દ્રીભૂતભાવુકઃ ।
શ્રીરામબન્ધુમિત્રાતિભાગ્યવિસ્મયકીર્તનઃ ॥ ૪૭૭॥

શ્રીરામમાનસસ્થાપનનામકુસુમાર્ચનઃ ।
શ્રીરાગગીતપૂજાર્ચનનામસુમમાહિનઃ ॥ ૪૭૮॥

શ્રીરામચરણશ્રાયહૃદબ્જસુમપૂજનઃ ।
શ્રીરામસ્વેહપરસર્વસ્વપૂર્ણૈક્યદિવ્યગઃ ॥ ૪૭૯॥

શ્રીરામરાગરત્નાવલીભૂષરીતિગૌલગઃ ।
શ્રીપમાનસપૂજાવિધ્યેતદ્રાગસુગાયનઃ ॥ ૪૮૦॥

શ્રીરામધ્યાનસઙ્ગીતસદ્ગઙ્ગાસ્નાનપાવનઃ ।
શ્રીરામાન્દોલિકારાગસુધારસગપાયનઃ ॥ ૪૮૧॥

શ્રીરામાકૃતિનાદબ્રહ્માનન્દરસગારસઃ ।
શ્રીરામનાદનવરત્નહૃન્મણ્ડપગારમઃ ॥ ૪૮૨॥

શ્રીરામસ્વાર્તિગાલાપકેદારગૌલવાગ્રસઃ ।
શ્રીરમારમણશરણાર્થનજપપૂજનઃ ॥ ૪૮૩॥

શ્રીકૃષ્ણકીર્તનગતિહિન્દોલરમ્યમઞ્જુલઃ ।
શ્રીરામસ્વમનોભાવવેદ્યાર્થનકીર્તનઃ ॥ ૪૮૪॥

શ્રીરામપદસેવાસ્વપૂર્વપૂજાફલામુદઃ ।
શ્રીરામલાલનસ્વાદુપ્રશાન્તોત્સવકીર્તનઃ ॥ ૪૮૫॥

શ્રીરામવાસરમ્યસ્વક્ષેત્રમઞ્જુલવર્ણનઃ ।
શ્રીવાણીનર્તનાહ્લાદમુખારીરાગકીર્તનઃ ॥ ૪૮૬॥

શ્રીવાણીલયવીણાસઙ્ગીતસાર્ચિતરામકઃ ।
શ્રીવરાર્ચનસદ્ભક્તિસઙ્ગીતાલીનસદ્ગુરુઃ ॥ ૪૮૭॥

શ્રીરામોદારસૌલભ્યગુણગાનમુખારિગઃ ।
શ્રીરામભજનાદેશઃ ક્ષીણકૃત્સિદ્ધિખણ્ડનઃ ॥ ૪૮૮॥

શ્રીરાઘવસ્વપુન્નાગવરાલીકૃતિવન્દનઃ ।
શ્રીરાઘવસ્વવાઙ્મઞ્જુલસુસંસ્કૃતકીર્તનઃ ॥ ૪૮૯॥

શ્રીરામવર્ણનાતીતમહિમસ્વાદુગાયનઃ ।
શ્રીરામરૂપપરાક્રમગુણ્ડક્રિયકીર્તનઃ ॥ ૪૯૦॥

શ્રીરામભજનલઘુમુક્તિસાધનબોધનઃ ।
શ્રીરામગાભજનમલયમારુતસૌખ્યદઃ ॥ ૪૯૧॥

શ્રીરામજપનામધ્યાનપ્રાપ્તાનન્દમગ્નગઃ ।
શ્રીરામસહજજ્ઞાનભક્તિવૈરાગ્યકીર્તનઃ ॥ ૪૯૨॥

શ્રીવૃન્દાવનસારઙ્ગકમલાપ્તકુલાપ્તગઃ ।
શ્રીકલત્રાર્થિતવરાભયસ્વમિષ્ટકીર્તનઃ ॥ ૪૯૩॥

શ્રીનારાયણગૌલશ્રીરામસ્થિરાદિમૂલગઃ ।
શ્રીશેષતલ્પશયસન્નુતિગમ્ભીરકીર્તનઃ ॥ ૪૯૪॥

શ્રીકાન્તસ્વાન્તસિદ્ધાન્તાજ્ઞાતદુર્માર્ગખણ્ડનઃ ।
શ્રીરામશુભલક્ષણશ્રુતિવેદ્યસ્વરૂપગઃ ॥ ૪૯૫॥

શ્રીરામાવતરપરાદિમૂલજ્ઞાનકીર્તનઃ ।
શ્રીસીતારામસર્વાત્મજ્ઞાનસંપુષ્ટિકીર્તનઃ ॥ ૪૯૬॥

શ્રીનભોમણિકુલલલામશ્રીરામગાનુતિઃ ।
શ્રીદાશરથિસર્વસ્વસ્તુત્યતીતમહત્ત્વગઃ ॥ ૪૯૭॥

શ્રીપપ્રિયસુસઙ્ગીતોપાસનસ્વરસાલયઃ ।
શ્રીગામઞ્જીરઘલ્કૃતદિવ્યાવતારસદ્ગુરુઃ ॥ ૪૯૮॥

શ્રીરામબલહંસસ્વકીર્તનાર્થનિરામયઃ ।
શ્રીરામસ્વૈકદૈવસ્વહૃદ્ધાસપ્રેમગાયનઃ ॥ ૪૯૯॥

શ્રીરામોત્સવસેવાસ્વાદ્વૈતસામ્રાજ્યકીર્તનઃ ।
શ્રીરામભક્તિવૈરાગ્યનિધિસાયુજ્યભાગ્યગઃ ॥ ૫૦૦॥

શ્રીરામરૂપમોદધ્યાતપ્રેમપૂરમાનસઃ ।
શ્રીરામજપશરણાશ્રયકલ્યાણિગાયનઃ ॥ ૫૦૧॥

શ્રીરામસ્વૈકગતિદિનરાત્રિભાવભાવુકઃ ।
શ્રીદાશરથિસર્વાદૃષ્ટહૃત્સ્થનામતારકઃ ॥ ૫૦૨॥

શ્રીરામસ્વાજનનભક્તહસ્તાનયગાર્થનઃ ।
શ્રીપગામઞ્જરીકુલ્લરાગપુષ્પમધુદ્રવઃ ॥ ૫૦૩॥

શ્રીવેઙ્કટેશદર્શનાચ્છાદપાટનગાર્થનઃ ।
શ્રીપદર્શનસંવારમદમાત્સર્યહારગઃ ॥ ૫૦૪॥

શ્રીહરિસ્થિતમતિજિહ્વરાજહરિનામગઃ ।
શ્રીદનામતપોભક્તિફલૈકહરિરામગઃ ॥ ૫૦૫॥

શ્રીરામનુતિનિન્દાસ્તુતિહાસ્યરસપૂરિતઃ ।
શ્રીરામસુગુણાગાનશ્રૈષ્ઠ્યસોલ્લુણ્ઠકીર્તનઃ ॥ ૫૦૬॥

શ્રુતિતાલલયારમ્યકૃતિવન્દિતરામકઃ ।
શ્રુતમાત્રમનોગાલકૃતિવૃન્દારસદ્ગુરુઃ ॥ ૫૦૭॥

શ્રેષ્ઠોત્કૃષ્ટસુગાવૃન્દનાદોપાસિતરાઘવઃ ।
શ્રેષ્ઠસદ્ભક્તિગાનશ્રીરામસ્વવશસદ્ગુરુઃ ॥ ૫૦૮॥

શ્રોત્રસુસ્વરસુમુખરામનામસુગાસુખઃ ।
શ્રૌષ્ટિમાનસરામાબાલ્યસેવાપરસામુદઃ ॥ ૫૦૯॥

શ્લક્ષ્ણસઙ્ગીતગઙ્ગાભિષિક્તતારકરામકઃ ।
શ્લક્ષ્ણસઙ્ગીતધારાનુગ્રહસદ્ગુરુદૈવકઃ ॥ ૫૧૦॥

શ્લાખિતસ્વાશુસત્કીર્તનવૃન્દાચાર્યદૈવતઃ ।
શ્લિષ્ટશ્રીરામસર્વાલઙ્કારોપચારગાલયઃ ॥ ૫૧૧॥

શ્લોકિતશ્રીરઘુવરપદચિન્તનજીવનઃ ।
શ્લોકિતશ્રીહરિગુણપ્રાસાનુપ્રાસરાસગઃ ॥ ૫૧૨॥

શ્લોકિતોત્કૃષ્ટનાદોપાસનસ્વજીવસદ્ગુરુઃ ।
શ્વાસમિશ્રિતરામોત્તમનામગાનજીવનઃ ॥ ૫૧૩॥

શ્વાસાર્ચિતસ્વજીવાધારરામગાનસદ્ગુરુઃ ।

ષડ્જાધારશ્રુતિસ્વાદુસઙ્ગીતાલયવિગ્રહઃ ॥ ૫૧૪॥

ષડ્જાદિસ્વરરાગજ્ઞાનભક્તિગાનભાવુકઃ ।
ષડ્જાદિસ્વરસઙ્ગીતમર્મકોવિદવન્દનઃ ॥ ૫૧૫॥

ષડ્રિપુસૂદનશ્રીપપદભક્તવરેણ્યગઃ ।
ષડ્વિધમાર્ગિણીરાગરામદૂતાઞ્જનેયનુઃ ॥ ૫૧૬॥

ષડાસ્યબાલલીલાવર્ણનકીર્તનસન્નુતિઃ ।
ષડાનનનુતિસ્તોત્રતોડીકીર્તનગારુચિઃ ॥ ૫૧૭॥

ષડાસ્યમાતુલશ્રીરામસ્વહૃદ્ભૂષભાષણઃ ।
ષણ્મુખપ્રિયભાવાઢ્યસ્વમનોભાવગાયનઃ ॥ ૫૧૮॥

ષાડવૌડવસંપૂર્ણરાગસ્વરૂપભૂચરઃ ।
ષોડશોપચારશ્રીરામનિત્યોપાસનાયુતઃ ॥ ૫૧૯॥

સઙ્ગીતસુસ્વરસ્વાદુનાદમણ્ડલસંવૃતઃ ।
સઙ્ગીતદેવતાપૂર્ણવાસસત્કૃતિમણ્ડલઃ ॥ ૫૨૦॥

સઙ્ગીતલોલસઙ્ગીતલોલસઙ્ગીતદૈવતઃ ।
સઙ્ગીતસ્વરમૂલશ્વાસસઁલ્લયમાનસઃ ॥ ૫૨૧॥

સઙ્ગીતશાસ્ત્રસુજ્ઞાનસારૂપ્યસૌખ્યભાગ્યગઃ ।
સઙ્ગીતજ્ઞાનસદ્ભક્તિસન્માર્ગબોધસદ્ગુરુઃ ॥ ૫૨૨॥

સઙ્ગીતપૂજિતશ્રીરામદયાવશ્યગાયનઃ ।
સત્ત્વશ્રીરામપૂજાવેલસમક્ષોપદેશગઃ ॥ ૫૨૩॥

સત્શ્રીરામદયાપાત્રૈકસદ્દર્શનસૌખ્યગઃ ।
સઙ્ગીતરામસદ્દર્શસૌખ્યાનુભૂતભાવુકઃ ॥ ૫૨૪॥

સજ્જ્ઞાનબોધરામસ્વાદુગાનભજનારમઃ ।
સત્સઙ્ગરામશિક્ષાસગુણનિર્ગુણસુજ્ઞગઃ ॥ ૫૨૫॥

સપ્તસ્વરમધુરધ્વનિલીનભજનારમઃ ।
સપ્તસ્વરસ્ફુરચ્છોભાજગન્મોહિનિસત્કૃતિઃ ॥ ૫૨૬॥

સર્વરક્ષકરામસ્વગાનરક્ષાભિબન્ધનઃ ।
સર્વાન્તર્યામિરામસ્વાન્તર્નિષ્ઠાપરગાયનઃ ॥ ૫૨૭॥

સંસારભીત્યપોહોંકારધામરામકીર્તનઃ ।
સઙ્ગીતયદુકુલકામ્ભોજશ્રીકૃષ્ણમાહિનઃ ॥ ૫૨૮॥

સદાશિવમયોંકારસ્વરનાદરહસ્યવિત્ ।
સઙ્ગીતયોગફલભોગજીવન્મુક્તસદ્ગુરુઃ ॥ ૫૨૯॥

સચ્ચિત્તરઞ્જનીગઙ્ગાધરનાદસ્વરૂપગઃ ।
સચ્ચિત્તરઙ્ગપાદાબ્જસદ્ગઙ્ગાપૂતકીર્તનઃ ॥ ૫૩૦॥

સત્કામવર્ધનીગઙ્ગાધરનામોક્તિચોદનઃ ।
સજ્જ્ઞાનવર્ધનીગીતરામસામર્થ્યમાહિનઃ ॥ ૫૩૧॥

સદ્ભક્તિપદવીગીતરાગસાલગભૈરવિઃ ।
સત્ત્વશ્રીરામતત્ત્વાજ્ઞભવમજ્જનખણ્ડનઃ ॥ ૫૩૨॥

સત્ત્વસ્વમાનસાધ્યાતકમલાશ્રીમનોહરિઃ ।
સત્ત્વપૂજાપુલકસાર્થિતરામાસ્યદર્શનઃ ॥ ૫૩૩॥

સદાન્વેષિતરામસ્વપુનર્દર્શનહર્ષગઃ ।
સદ્રાગબિલહરિસોત્સાહકીર્તનમઞ્જુલઃ ॥ ૫૩૪॥

સપ્રતાપવરાલીનચિન્તનસ્વાનુભૂતિગઃ ।
સકલાર્થેહભવતારણસ્વશરણાગતઃ ॥ ૫૩૫॥

સંદેહરૂપપદપાદુકામહિમસારગઃ ।
સનકાદ્યર્ચિતપદશ્રીરામસ્વસુભાગ્યગઃ ॥ ૫૩૬॥

સરસાનૂતશ્રીરામકાપિનારાયણીકૃતિઃ ।
સરસસ્વજગુણ્યશ્રીરામસ્વાનુભવાનુતિઃ ॥ ૫૩૭॥

સરસાદ્ભુતવાક્સારસંસિક્તરામચન્દ્રકઃ ।
સરકીર્તનગાગઙ્ગો રામાભિષેકગાસરિઃ ॥ ૫૩૮॥

સરસીરુહમુખચિદ્ઘનશ્રીરામસાલપઃ ।
સરસીરુહનયનકટાક્ષાનન્દગાલપઃ ॥ ૫૩૯॥

સર્વરામમયાદર્શકીર્તનાનન્દભૈરવિઃ ।
સર્વાધારસ્વરામસ્વમનોજ્વાલાર્તિવેદનઃ ॥ ૫૪૦॥

સર્વસાક્ષ્યન્વયનિજભક્તિવિષયવિરક્તિગઃ ।
સદ્ભક્તપાલનશ્રીરામગાનરસવાચકઃ ॥ ૫૪૧॥

સરસ્વતીગસુજ્ઞાનમૂલાનુરાગગાયનઃ ।
સગુણધ્યાનજાન્તર્જ્ઞાનવાક્પુષ્ટિરસામૃતઃ ॥ ૫૪૨॥

સન્નરાકૃતિરામસ્વસુધાભજનભાગ્યવાન્ ।
સરસઙ્ગતિવાગ્વર્ષશરવર્ષસ્વરામગઃ ॥ ૫૪૩॥

સત્ત્વશ્રીરામસન્નૂતિસરસ્વતીમનોહરિઃ ।
સત્ત્વસુજ્ઞાનસંપુષ્ટિવાગ્રાગરસસત્કૃતિઃ ॥ ૫૪૪॥

સરસ્વતીમનોહાર્યન્તરાત્મરાઘવાનુતિઃ ।
સરસ્વતીલસદ્વાણીસુલાસ્યજિહ્વવાઙ્નુતિઃ ॥ ૫૪૫॥

સંસારાનિત્યમતિહીનાપ્રાપ્યરામભક્તિગઃ ।
સર્વશ્રીહરિભાવઙ્કૈકપ્રાપ્તિરામભક્તિગઃ ॥ ૫૪૬॥

સહાજાજાનિસંદર્શપુલકાઙ્કિતકીર્તનઃ ।
સહાભૃદૃષ્ટરામવચનહર્ષાશ્રુપૂરિતઃ ॥ ૫૪૭॥

સસીતરામગાનક્ષીરાબ્ધિસેવનભાવુકઃ ।
સકલાગમસઞ્ચારસઞ્ચારમઞ્જુસત્કૃતિઃ ॥ ૫૪૮॥

સકલાગમનુતશિવાકલ્યાણીકૃતિસ્તુતિઃ ।
સકલાધરગૌરીનુપ્રાસચ્છવિલસત્કૃતિઃ ॥ ૫૪૯॥

સનાતનપરબ્રહ્મસુજ્ઞાનફલમઞ્જરિઃ ।
સનન્દનનુતશ્રીરામનામરસમઞ્જરિઃ ॥ ૫૫૦॥

સચ્ચિત્તશાયિગાયનસાતઙ્કકલિદુષ્કૃતિઃ ।
સત્ત્વકીર્તનમાતાતગુરુભક્તિવિલોપગઃ ॥ ૫૫૧॥

સદ્ધ્યાનભજનાખ્યાનકૃતિરાગવિવર્ધનિઃ ।
સન્માર્ગગમનકુમાર્ગત્યજનોપદેશનઃ ॥ ૫૫૨॥

સામાદિવેદસારશ્રીરામૈકભક્તિનિષ્ઠિતઃ ।
સામાદિનિગમાચારહરિમઙ્ગલગારતિઃ ॥ ૫૫૩॥

સામપ્રશાન્તકૃતિમનશ્શાન્ત્યવશ્યગાયનઃ ।
સામગાભક્તિસત્સઙ્ગધ્યાનોપદેશસદ્ગુરુઃ ॥ ૫૫૪॥

સાવેરીરાગસઙ્ગીતકાવેરીતીરરામકઃ ।

સાવેરીરાગહૃદ્બાલજયસીતાપરામગઃ ॥ ૫૫૫॥

સારઙ્ગરામસદ્દર્શપ્રસાદભાગ્યગાયનઃ ।
સારઙ્ગસ્વરસદ્ધ્યેયસ્સારઙ્ગરાગરઞ્જનઃ ॥ ૫૫૬॥

સારઙ્ગરાગગાવીચિસુસ્વરાનન્દસાગરઃ ।
સારામરામમારામહરિનામસુગારમઃ ॥ ૫૫૭॥

સારસારસરામોપાસનસન્નામસારગઃ ।
સાર્વભૌમસ્વહૃત્સાકેતરામપરત્વસૂચનઃ ॥ ૫૫૮॥

સિન્ધુરામક્રિયારાગસુધામાધુર્યભાષગઃ ।
સિન્ધુરામક્રિયાયોગસદાશિવવરાનુતિઃ ॥ ૫૫૯॥

સિદ્ધસેનાકૃતિસ્વાતઙ્કભવાબ્ધિનિમગ્નકૃપણોદ્ધારણ-
-રામજ્ઞાપનમહાન્તલોપગઃ ॥ ૫૬૦॥

સિંહેન્દ્રમધ્યમશ્રીરામરક્ષાર્થનકીર્તનઃ ।
સિદ્ધયોગિગણાવન્ધશ્રીરામષરણાગતઃ ॥ ૫૬૧॥

સીતાપપૂજનાલઙ્કારસ્વાનુરાગયોગગઃ ।
સીતામનોહરાપૂજનાનન્યગતિગાયનઃ ॥ ૫૬૨॥

સીતાસરામસરયૂદર્શકૃતિમનોહરિઃ ।
સીતારામસુકારુણ્યકટાક્ષવચનોક્તિગઃ ॥ ૫૬૩॥

સીતારામકમાસ્મેરસુજનાજીવકીર્તનઃ ।
સીતાપત્યભયપ્રેમોક્તિસ્વસિદ્ધાન્તગાયનઃ ॥ ૫૬૪॥

સીતાપત્રાણસંપ્રાર્થનકીર્તનસુમુત્યકઃ ।
સીતાવલ્લભભક્તત્રાણચારિત્રસુગાયનઃ ॥ ૫૬૫॥

સીતારામસ્વભક્તિસ્થૈર્યાર્થનકીર્તનાહરઃ ।
સીતારામસ્વરૂપસ્થિરમાનસાબ્જભાગ્યવાન્ ॥ ૫૬૬॥

સીતારામપ્રિયારામપાદુકાશ્રૈષ્ઠ્યસૂચનઃ ।
સીતારામસ્વભાગ્યપ્રેષ્ઠકીર્તનરસાનુતિઃ ॥ ૫૬૭॥

સીતાશ્રીમણિરામાપુણ્યમન્ત્રમહિમાસ્પદઃ ।
સીતાકલ્યાણવૈભોગકીર્તનવિશ્રમારમઃ ॥ ૫૬૮॥

સીતાશ્રીમણિરઙ્ગસ્ફુરત્પાર્શ્વહરિપૂજનઃ ।
સીતાપત્યારતિવિરાજસ્વાનુરાગમાનસઃ ॥ ૫૬૯॥

સીતાહૃદબ્જખદ્યોતદ્યોતિતામૃતવાક્સરિઃ ।
સીતારામસુનામસ્વતારકાદ્યધિપોતગઃ ॥ ૫૭૦॥

સીતાશ્રીજાનકીમાહિનકામ્ભોજિગસન્નુતિઃ ।
સીતાશ્રીજાનકીમાહાત્મ્યાતુલ્યગુણગાકૃતિઃ ॥ ૫૭૧॥

સીતાનાથરઘુવરાપ્રમેયાભરણસ્તુતિઃ ।
સીતારામાવતારસુકારુણ્યહરિસન્નુતિઃ ॥ ૫૭૨॥

સુકલ્યાણવસન્તસૌખ્યબ્રહ્માનન્દનાદલીઃ ।
સુસ્વાદુફલસપ્તસ્વરરાગનાદસામુદઃ ॥ ૫૭૩॥

સુનાદલોલહરિજોષસપ્તસ્વરરાગલીઃ ।
સુન્દરાઙ્ગસ્વરામાવીક્ષિમનઃસ્થિતિવિસ્મયઃ ॥ ૫૭૪॥

સુસ્વરામૃદુવાક્સીતારામગાનપરાયણઃ ।
સુસ્વરાપૂજિતશ્રીપસુરાગસ્વરસાલયઃ ॥ ૫૭૫॥

સુવાગધીશ્વરીરાગપ્રાસાનુપ્રાસભાસગઃ ।
સુવાગધીશ્વરીવાણીપૂર્ણપ્રસન્નકીર્તનઃ ॥ ૫૭૬॥

સુજ્ઞાનપરપરમાત્મસર્વાન્તર્ગગાયનઃ ।
સુરભૂસર્વસૃષ્ટિવ્યાપિપરમાત્મગાલયઃ ॥ ૫૭૭॥

સુરામમન્ત્રમર્મજ્ઞસ્સુગારમરઘૂત્તમઃ ।
સુપોષિણીકૃતિસ્વાદુશૈલીગઙ્ગારયારમઃ ॥ ૫૭૮॥

સુકીર્તિતવરદરાજગાનાલોકસેવનઃ ।
સુસ્વરભૂષણીરાગલક્ષ્મીપસ્વરભૂષણઃ ॥ ૫૭૯॥

સુરતારકમધ્યશ્રીપચન્દ્રાલોકકીર્તનઃ ।
સુરસેવિતવરદોત્સવદર્શાર્થગાયનઃ ॥ ૫૮૦॥

સુપૂજાસમયમનોભાવસ્વરામસાલપઃ ।
સુપાદસ્પર્શહર્ષબ્રહ્માનન્દાનુભવાલપઃ ॥ ૫૮૧॥

સુનાદોપાસનપ્રાપ્તફલશ્રીનાથરામગઃ ।
સુપાદમહિમવૃદ્ધાશીર્વાદબલગાયનઃ ॥ ૫૮૨॥

સુકાવ્યાલાપવસન્તાભાસ્ફુરદ્રામકીર્તનઃ ।
સુરાપગાવસન્તચ્છવિસ્મિતરાગકીર્તનઃ ॥ ૫૮૩ ॥

સુનામભજનપ્રચોદનકલ્યાણિકીર્તનઃ ।
સુનાદપ્રણવારામસદ્ભક્તિભજનામુદઃ ॥ ૫૮૪ ॥

સુનામકીર્તનભજનાલયયોગિતલ્લજઃ ।
સુજ્ઞાનઘનસુપ્રાસવનકીર્તનરત્નકઃ ॥ ૫૮૫ ॥

સુજ્ઞાનનિધિધર્માદિમોક્ષપ્રદપરાત્મગઃ ।
સુગાનનિધિસત્કીર્તનાચાર્યસ્સુસ્વરાત્મકઃ ॥ ૫૮૬ ॥

સુરદેવાદિદેવસ્મરનામસ્મરગાસરઃ ।
સુરદેવાધિદેવસ્વરમાર્દવસુગાવરઃ ॥ ૫૮૭ ॥

સુસીતારામપાદાર્ચનૈકાન્તારાધનાલયઃ ।
સુનેત્રપૂરરામાદર્શહર્ષાઙ્કિતકીર્તનઃ ॥ ૫૮૮ ॥

સુપ્રાસવાગ્ભજનસીતારામનામકીર્તનઃ ।
સુમનોધ્યેયરામાભયરક્ષાર્થનરાગગઃ ॥ ૫૮૯ ॥

સુકીર્તનમનોગાલાર્થિતશ્રીરામભાષણઃ ।
સુપ્રાસનટવાઙ્મઞ્જુલમનોભાવગાયનઃ ॥ ૫૯૦ ॥

સુગુણાલયરઘુવરકીર્તનાભિરોરુદઃ ।
સુમનોરાગભાવસ્યન્દાર્થિતરામભાષણઃ ॥ ૫૯૧ ॥

સુવાગ્રીતીનવંશોત્તમપ્રશ્નકૃતિમઞ્જુલઃ ।
સુરાગભૈરવીલક્ષણાપૂરચારુગાયનઃ ॥ ૫૯૨ ॥

સુસ્વરાનન્દદાયશ્રીરામભાષણમિષ્ટગઃ ।
સુસ્વરાનન્દસારશ્રીરામમિષ્ટભાષગઃ ॥ ૫૯૩ ॥

સુત્રામપાલરઘુરામસારઙ્ગસુગારસઃ ।
સુમધ્યમાવતીનિન્દાસ્તુતિહાસ્યરસાર્ણવઃ ॥ ૫૯૪ ॥

સુમધ્યમાવતીગીતસ્વાનન્યશરણાગતિઃ ।
સુરસન્નુતરામોદારસ્વભાવનુસત્કૃતિઃ ॥ ૫૯૫ ॥

સુમધ્યમાવતીકીર્તિતરામનામમાહિનઃ ।

સુમઙ્ગલપ્રદારામનામભજનચોદનઃ ॥ ૫૯૬ ॥

સૂત્રધારિહરિશ્રીપરામાવતારનાટક-
-સૂક્ષ્મરહસ્યસુજ્ઞાનઘનકીર્તનરત્નકઃ ॥ ૫૯૭ ॥

સૂર્યેન્દુનેત્રસર્વૈકરાઘવસ્વાન્તરઙ્ગવિત્ ।
સૂર્યાન્વયજયન્તશ્રીરાઘવસ્તુતિસન્મતિઃ ॥ ૫૯૮ ॥

સૂર્યસોમવિભામૂલરામમાહિનગાયનઃ ।
સૂર્યવંશલલામશ્રીરામભક્તલલામગઃ ॥ ૫૯૯ ॥

સૂર્યકાન્તકૃતિવ્યક્તરામાસ્યચ્છવિવિસ્મયઃ ।
સૂર્યવંશજરામાસ્યકાન્ત્યાકર્ષિતમામુનિઃ ॥ ૬૦૦ ॥

સૂર્યપ્રકાશસીતાસુગુણસાત્ત્વિકવર્ણનઃ ।
સૂર્યોદયાગ્રસંધ્યાતસઙ્ગીતશ્રીપતન્મયઃ ॥ ૬૦૧ ॥

સૃપ્રસુસ્વરનાદોપાસનનારાયણાલયઃ ।
સૃષ્ટિસ્થિત્યન્તકારાનેકનામસારસારગઃ ॥ ૬૦૨ ॥

સેવિતસ્વકૃતિશ્રીસીતારામરાગપૂજનઃ ।
સેવાર્થિશિષ્યપૂર્ણાનુગ્રહકારકસદ્ગુરુઃ ॥ ૬૦૩ ॥

સોહંભાવસદાલીનસઙ્ગીતસ્વામિસદ્ગુરુઃ ।
સૌમઙ્ગલારતિજ્યોતિસ્સીતારામસુશોભનઃ ॥ ૬૦૪ ॥

સૌરાષ્ટ્રગીતવન્દ્યશ્રીગણનાથકૃતિસ્તુતિઃ ।
સૌરાષ્ટ્રઘનસદ્ગીતિસૌમઙ્ગલાવહાનુતિઃ ॥ ૬૦૫ ॥

સૌમ્યશ્રીરામસદ્ભક્તિમાર્ગાજ્ઞપરિદેવનઃ ।
સૌમ્યકીર્તનસંબોધધેનુકારાગરત્નકઃ ॥ ૬૦૬ ॥

સૌભાગ્યદાયિનીજાનકીરામભાગ્યગાયનઃ ।
સૌભાગ્યધેયરામસ્વપૂજાદર્શનભાગ્યવાન્ ॥ ૬૦૭ ॥

સૌમ્યશ્રીરામનામામૃતરસાપાનચોદનઃ ।
સૌરિનારાયણહરિસ્મરનામરસાપ્લવઃ ॥ ૬૦૮ ॥

સૌમિત્રિભાગ્યસીતારામશેષતલ્પસેવન-
-તત્ત્વાર્થાપૂર્વરાગાલાપહર્ષસ્વાનુભૂતિગઃ ॥ ૬૦૯ ॥

સૌન્દર્યદેવતાસીતાસરામાદર્શમાનસઃ ।
સૌમઙ્ગલપ્રદાનન્દજયમઙ્ગલગાયનઃ ॥ ૬૧૦ ॥

સ્વમનોહરસીતારાઘવબોધસપૂજનઃ ।
સ્વજ્ઞાનબોધનાનાવિધારાધિતસ્મિતાનનઃ ॥ ૬૧૧ ॥

સ્વરભૂષાવલીમણ્ડિતસ્વેષ્ટદૈવરામકઃ ।
સ્વરામાનુભવાન્તર્લયસમ્ભાષણકીર્તનઃ ॥ ૬૧૨ ॥

સ્વરમાલવિકાશશ્રીહરિપાદસુરાગગઃ ।
સ્વરસપ્તકઘણ્ટામણ્ડિતકોદણ્ડરામગઃ ॥ ૬૧૩ ॥

સ્વરવિદ્યાતિસૂક્ષ્મશ્રીનારદમુનિબોધિતઃ ।
સ્વરાર્ણવરહસ્યશ્વેતાદ્યુપદેશમર્મવિત્ ॥ ૬૧૪ ॥

સ્વરરાગસુધાસ્રાવશઙ્કરાભરણાસરઃ ।
સ્વરસદ્રસવિદ્રાવસ્વર્ગાપવર્ગકીર્તનઃ ॥ ૬૧૫ ॥

સ્વરરાગસુધાસારશઙ્કરાભરણાનદઃ ।
સ્વરકોલાહલારાવધ્વનિકીર્તનસઙ્ગતિઃ ॥ ૬૧૬ ॥

સ્વરસારરસાસારસ્વરલોલસ્વરામગઃ ।
સ્વરસારસરાગશ્રીરામરાગરસાસરઃ ॥ ૬૧૭ ॥

સ્વરતાલગતિજ્ઞાનશુદ્ધમાનસગારતિઃ ।
સ્વરમૂલપ્રણવગુપ્તાનન્દમોક્ષનાદવિત્ ॥ ૬૧૮ ॥

સ્વરસઙ્ગીતસુજ્ઞાનબ્રહ્માનન્દનિધિપ્લવઃ ।
સ્વરાનન્દનિધિપ્લાવસુજ્ઞાનઘનકીર્તનઃ ॥ ૬૧૯ ॥

સ્વરસપ્તસુખાલાપરાગસ્વરૂપસઁલ્લયઃ ।
સ્વરરાગલયશ્રીરામનામરસપાનગઃ ॥ ૬૨૦ ॥

સ્વરરાગલયસુધારસમિશ્રિતકણ્ડમિષ્ટરામનામસૌખ્યાનુભવસંમગ્નસદ્ગુરુઃ ॥ ૬૨૧ ॥

હંસધ્વનિસુસંક્ષિપ્તરામાયણકથારસઃ ।
હંસરામસુપાદાબ્જશરણાગતિગાયનઃ ॥ ૬૨૨ ॥

હંસનાદસુરાગસ્વરામસેવકકીર્તનઃ ।
હંસાનન્દિયતિશ્રેષ્ઠો હંસાત્માનુભવાલયઃ ॥ ૬૨૩ ॥

હંસભ્રમરિકાવેલહંસકૃષ્ણહરિસ્મરઃ ।
હંસતૂલિકાશાયિશ્રીરામમિષ્ટલાલિગઃ ॥ ૬૨૪॥

હંસરામપરબ્રહ્મતત્ત્વાર્થબોધકીર્તનઃ ।
હરિરામાવતારસ્વાદુકીર્તનસુરાગગઃ ॥ ૬૨૫॥

હરિકામ્ભોજિરાગશ્રીહરિકીર્તનહૃદ્વલઃ ।
હરિપાદાબ્જસુખકષ્ટસ્વૈકગતિગાયનઃ ॥ ૬૨૬॥

હરિકેદારગૌલશ્રીરામપરત્વસૂચનઃ ।
હરિનામસુમામોદહરિશાયનલાલિગઃ ॥ ૬૨૭॥

હરિકેદારગૌલશ્રીહરિનામસુગાહરઃ ।
હરિકેશવગોવિન્દમાધવાનાદગાહરિઃ ॥ ૬૨૮॥

હરિનારાયણાગાનનામસઁલ્લીનસદ્ગુરુઃ ।
હરિકીર્તનતેજસ્વી શિરસ્સ્પર્શિતસત્પદઃ ॥ ૬૨૯॥

હરિધ્યાનસુતીર્થાભિષિક્તશ્રીપવરાકૃતિઃ ।
હરિનામસુમારાધિતશ્રીરામસ્વરાકૃતિઃ ॥ ૬૩૦॥

હરિનામસુગાનશ્રીહરિસેવનગાયનઃ ।
હર્યન્તરઙ્ગસંદર્શનાવનીજાસપૂજનઃ ॥ ૬૩૧॥

હાટકદ્યુતિસીતાપશૃઙ્ગારરામચિન્તનઃ ।
હાટકસ્ફુરસત્કીર્તનાનુભૂતસ્વરામકઃ ॥ ૬૩૨॥

હિન્દોલગીતનાદાદ્રિદીપશ્રીમુરલીધરઃ ।
હિમાદ્રિજ્ઞાનસદ્ભક્તિગઙ્ગાપ્રવહકીર્તનઃ ॥ ૬૩૩॥

હેમગઙ્ગાસ્રવાગીતરામાદ્વિતીયમાહિનઃ ।
હેમહેમવતીગઙ્ગાસારસદ્જ્ઞાનવર્ષકઃ ॥ ૬૩૪॥

હૈમમાનસપીઠશ્રીરામનામસુમાર્ચનઃ ।
હૈમનસ્વાદુસત્કીર્તનરાગજિતરામકઃ ॥ ૬૩૫॥

હૃદયઙ્ગમસત્કીર્તનાવલીવાસસદ્ગુરુઃ ।
હૃદન્તરઙ્ગસુસ્ફોટરાગપુષ્પાવલીનુતઃ ॥ ૬૩૬॥

નાદબ્રહ્મરસાકારરામગાનરસાકૃતિઃ ।
નામરૂપાદિસર્વસ્વરામૈક્યગુરુદૈવતઃ ॥ ૬૩૭॥

ત્યાગગઙ્ગાનિમગ્નૈકશિષ્યાશ્રુગઙ્ગિકાપ્લુતઃ ।
રાગગઙ્ગાપ્લવાપૂતશ્લોકપુષ્પાવલીનુતઃ ॥ ૬૩૮॥

ત્યાગરાજગુરુસ્વામિકૃતિરાગાક્ષરાવલી ।
ગુરુદેવપદામ્ભોજશિષ્યાપુષ્પાસમર્પિતા ॥ ૬૩૯॥

ગુરુસ્ફૂર્તિસ્ફુટસ્તોત્રં ગુરુસમ્પૂર્ણવાસનમ્ ।
નાદયોગિગુરુસ્વામિપૂર્ણાનુગ્રહકારકમ્ ॥ ૬૪૦॥

રાગમૂર્તે ગુરુસ્વામિન્ રાગાક્ષરસુમાલિક ।
ન જાનામિ ક્વચિલ્લેખાં ત્વયૈવ રચિતં શુભમ્ ॥ ૬૪૧॥

મદાશ્રયસદાચાર્ય દેહિ મે તવ દર્શનમ્ ।
મદન્તઃસતતાવાસ અગ્રયાગચ્છ મદ્ગુરો ॥ ૬૪૨॥

દેવગાન્ધર્વગાનં તે શ્રોતુમિચ્છામિ મત્પ્રભો ।
રક્તિરાગલયજ્ઞાનભિક્ષાં દેહિ મમ પ્રભો ॥ ૬૪૩॥

રાગાનુરાગસદ્ગાનપૂજાવરં પ્રદેહિ મે ।
નાદોપાસનભાગ્યં ચ કુરુ મે નાદસાત્મતામ્ ॥ ૬૪૪॥

મઙ્ગલં તે મદાચાર્ય મઙ્ગલં માર્ગદર્શક ।
મઙ્ગલં મમ સર્વસ્વ મઙ્ગલં મઙ્ગલપ્રભો ॥ ૬૪૫॥

મઙ્ગલં ત્યાગરાજાય રાગરાજાય મઙ્ગલમ્ ।
મઙ્ગલં રાગદૈવાય ગુરુનાથાય મઙ્ગલમ્ ॥ ૬૪૬॥

મઙ્ગલં ત્યાગરાજાય મઙ્ગલં નાદયોગિને ।
મઙ્ગલં રામગેયાય મઙ્ગલં સર્વસિદ્ધયે ॥ ૬૪૭॥

મઙ્ગલં રાગરામાય ત્યાગરાજાર્ચિતાય ચ ।
મઙ્ગલં નાદલોલાય સીતારામાય મઙ્ગલમ્ ॥ ૬૪૮॥

ૐ

શુભમસ્તુ ।

## ॥ સદ્ગુરુ મઙ્ગલાષ્ટકમ્ ॥

સપ્તસ્વરસુરૂપાય સઙ્ગીતાવતરાય ચ ।
ષડ્જાદિસ્વરસેવ્યાય સદ્ગુરવે સુમઙ્ગલમ્ ॥ ૧॥

ઋષભારૂઢનગજોક્તસ્વરાર્ણવગાય ચ ।
ઋષિવન્દ્યસ્વરામાનુરાગગેયાય મઙ્ગલમ્ ॥ ૨॥

ગઙ્ગાજનકપાદાબ્જનુતિગાનાય મઙ્ગલમ્ ।
ગઙ્ગાસ્નાનફલાદાયગાગઙ્ગાય સુમઙ્ગલમ્ ॥ ૩॥

મઙ્ગલપ્રદસીતારામસદ્ભક્તાય મઙ્ગલમ્ ।
મઙ્ગલાચાર્યદેવાય મઙ્ગલ્યગાય મઙ્ગલમ્ ॥ ૪॥

પઞ્ચમારામગાનાય પઞ્ચાપગાય મઙ્ગલમ્ ।
પઞ્ચમીતિથિપૂજ્યાય ગુરુદેવાય મઙ્ગલમ્ ॥ ૫॥

ધનસ્વરામદૈવાય ધનેપ્સાલોપયોગિને ।
ધનકીર્તનધેયાય ત્યાગરાજાય મઙ્ગલમ્ ॥ ૬॥

નિર્મલાચાર્યદેવાય નિર્મલાચ્યુતવન્દિને ।
નિર્મલામોદપુષ્પાવલ્યામોદિતાય મઙ્ગલમ્ ॥ ૭॥

સત્સઙ્ગરામદૈવાય સઙ્ગીતયોગનિશ્ચયે ।
સઙ્ગીતસ્વરમિષ્ટાય  સદ્ગુરવે સુમઙ્ગલમ્ ॥ ૮॥

ૐ

શુભમસ્તુ ।

Encoded and proofread by
N V Vathsan nvvathsan at gmail dot com
Radhika Vathsan radhika vathsan at gmail dot com

Translation is available in the linked PDF file.

Copyright Pushpa Srivatsan

*Sadguru Śrī Tyāgabrahma Sahasrakam Part II*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*

**Temporary page!**

LaTeX was unable to guess the total number of pages correctly. As there was some unprocessed data that should have been added to the final page this extra page has been added to receive it.

If you rerun the document (without altering it) this surplus page will go away, because LaTeX now knows how many pages to expect for this document.